# Brihadaranyaka Upanishad with Vedic Accents

# બૃહદારણ્યકોપનિષત્ સસ્વરા

## Document Information

Text title : bRihadAraNyakopaniShat

File name : bri.itx

Category : upanishhat, svara

Location : doc_upanishhat

Author : Vedic Tradition

Transliterated by : Marcos Albino

Description-comments : The upanishad has only Udatta and Anudatta (no svarita, vertical line above)

Source : Mantrapushpam, Ramkrishna Mission, Khar

Latest update : January 31, 1997, February 2, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# બૃહદારણ્યકોપનિષત્ સસ્વરા

References : Titus Texts : Jost Gippert.

shuklayajurveda White Yajur-Veda

Text: BAUp BrihadAraNyakaupaniShad

MAdhyandina-Recension / KANva-Recension (M or K, or both MK)

ch : Chapter.  p : Paragraph

On the basis of the editions by

Albrecht Weber,

The Shatapatha-Brahmana in the Madhyandina-shAkhA  (SBM)

with extracts from the commentaries of SAyaNa, HarisvAmin and DvivedAnga,

Berlin 1849 / Repr. Varanasi 1964 (Chowkhamba Sanskrit Ser., 96)

and

Willem Caland,

The Shatapatha BrAhmaNa in the KANvIya Recension, (SBK)

rev. ed. by Raghu Vira, Lahore 1926 / repr. Delhi 1983

ch1

ch1 = SBM 10.6.4.1 = SBK16.3.1.1-2

pMK1

ઉષા  વા  અશ્વસ્ય મેધ્યસ્ય શિરઃ, સૂર્યશ્ચક્ષુઃ વાતઃ પ્રાણો,
વ્યાત્તમગ્નિર્વૈશ્વાનરઃ, સંવત્સર  આત્માશ્વસ્ય મેધ્યસ્ય દ્યૌષ્પૃષ્ઠમ્
અન્તરિક્ષમુદરં, પૃથિવી  પાજસ્યં, દિશઃ પાર્શ્વે, અવાન્તરદિશઃ પર્શવ,
ઋતવોઽઙ્ગાનિ, માસાશ્ચાર્ધમાસાશ્ચ પર્વાણિ અહોરાત્રાણિ પ્રતિષ્ઠા,
નક્ષત્રાણ્યસ્થીનિ, નભો મા ꣳ સાનિ ઊવધ્ય ꣳ  સિકતાઃ, સિન્ધવો ગુદા,
યકૃચ્ચ ક્લોમાનશ્ચ પર્વતા, ઓષધયશ્ચ વનસ્પતયશ્ચ લોમાનિ

ઉદ્યન્પૂર્વાર્ધો, નિમ્લોચઙ્જઘનાર્ધો, યદ્વિજૃમ્ભતે, તદ્વિદ્યોતતે,
યદ્વિધૂનુતે, તત્સ્તનયતિ, યન્મેહતિ, તદ્વર્ષતિ, વાગેવાસ્ય વાક્ ।

pMK2

અહર્વા અશ્વં પુરસ્તાન્મહિમાન્વજાયત, તસ્ય પૂર્વે સમુદ્રે યોની;
રાત્રિરેનં પશ્ચાન્મહિમાન્વજાયત, તસ્યાપરે સમુદ્રે યોનિઃ એતૌ વા અશ્વં
મહિમાનાવભિતઃ સમ્બભૂવતુઃ । હયો ભૂત્વા દેવાનવહદ્ વાજી ગન્ધર્વાન્
અર્વાસુરાન્ અશ્વો મનુષ્યાન્ત્ । સમુદ્ર એવાસ્ય બન્ધુઃ, સમુદ્રો યોનિઃ ।

ch2 = SBM 10.6.5.1-3 = SBK16.3.2.1-7

pMK1

નૈવેહ કિં ચનાગ્ર આસીન્ ।
મૃત્યુનૈવેદમાવૃતમાસીદશનાયયાશનાયા હિ મૃત્યુઃ ।
તન્મનોઽકુરુતાત્મન્વી સ્યામિતિ । સોઽર્ચન્નચરત્ । તસ્યાર્ચત
આપોઽજાયન્તાર્ચતે વૈ મે કમભૂદિતિ । તદેવાર્ક્યસ્યાર્કત્વમ્ । કꣳ
હ વા અસ્મૈ ભવતિ, ય એવમેતદર્ક્યસ્યાર્કત્વં વેદ ।

pMK2

આપો વા અર્કઃ । તદ્યદપાꣳ શર આસીત્ તત્સમહન્યત, સા
પૃથિવ્યભવત્ । તસ્યામશ્રામ્યત્ । તસ્ય શ્રાન્તસ્ય તપ્તસ્ય તેજો રસો
નિરવર્તતાગ્નિઃ ।

pMK3

સ ત્રેધાત્માનં વ્યકુરુતાદિત્યં તૃતીયં, વાયું તૃતીયꣳ । સ એષ
પ્રાણસ્ત્રેધાવિહિતઃ । તસ્ય પ્રાચી દિક્શિરોઽસૌ ચાસૌ ચેર્માઉ અથાસ્ય
પ્રતીચી દિક્પુચ્છમ્ અસૌ ચાસૌ ચ સક્થ્યૌ; દક્ષિણા ચોદીચી ચ પાર્શ્વે,
દ્યૌષ્પૃષ્ઠમ્ અન્તરિક્ષમુદરમ્ ઇયમુરઃ, સ એષોઽપ્સુ પ્રતિષ્ઠિતો ।
યત્ર ક્વ ચૈતિ, તદેવ પ્રતિતિષ્ઠત્યેવં વિદ્વાન્ ।

pMK4

સોઽકામયતઃ દ્વિતીયો મ આત્મા જાયેતેતિ । સ મનસા વાચં મિથુનꣳ
સમભવદશનાયાં મૃત્યુઃ । તદ્યદ્રેત આસીત્ સ સંવત્સરોઽભવન્ । ન
હ પુરા તતઃ સંવત્સર આસ । તમેતાવન્તં કાલમબિભર્યાવાન્ત્સંવત્સરઃ ।
તમેતાવતઃ કાલસ્ય પરસ્તાદસૃજત । તં જાતમભિવ્યાદદાત્; સ ભાણકરોત્
સૈવ વાગભવત્ ।

pMK5

સ ઐક્ષતઃ યદિ વા ઇમમભિમઁ સ્યે, કનીયોઽન્નં કરિષ્ય ઇતિ । સ તયા
વાચા તેનાત્મનેદઁ સર્વમસૃજત, યદિદં કિઙ્ચર્ચો યજૂઁષિ
સામાનિ
છન્દાઁસિ યજ્ઞાન્પ્રજાં પશૂન્ત્ ।
સ યદ્-યદેવાસૃજત, તત્-તદત્તુમધ્રિયત । સર્વં વા અત્તીતિ,
તદદિતેરદિતિત્વઁ । સર્વસ્યાત્તા ભવતિ, સર્વમસ્યાન્નં ભવતિ, ય
એવમેતદદિતેરદિતિત્વં વેદ ।

pMK6

સોઽકામયતઃ ભૂયસા યજ્ઞેન ભૂયો યજેયેતિ । સોઽશ્રામ્યત્ સ તપોઽતપ્યત ।
તસ્ય શ્રાન્તસ્ય તપ્તસ્ય યશો વીર્યમુદક્રામત્ । પ્રાણા વૈ યશો વીર્યમ્ ।
તત્પ્રાણેષૂત્ક્રાન્તેષુ શરીરઁ શ્વયિતુમધ્રિયત; તસ્ય શરીર એવ મન
આસીત્ ।

pMK7

સોઽકામયતઃ મેધ્યં મ ઇદઁ સ્યાદાત્મન્વ્યનેન સ્યામિતિ । તતોઽશ્વઃ
સમભવદ્ । યદશ્વત્ તન્મેધ્યમભૂદિતિ । તદેવાશ્વમેધસ્યાશ્વમેધત્વમ્ ।
એષ હ વા અશ્વમેધં વેદ, ય એનમેવં વેદ ।

pM8/k7

તમનવરુધ્યેવામન્યત । તઁ સંવત્સરસ્ય પરસ્તાદાત્મન આલભત,
પશૂન્દેવતાભ્યઃ પ્રત્યૌહત્ । તસ્માત્સર્વદેવત્યં પ્રોક્ષિતં પ્રાજાપત્યમાલભન્ત ।
એષ વા અશ્વમેધો ય એષ તપતિ; તસ્ય સંવત્સર આત્માયમગ્નિરર્કઃ
તસ્યેમે લોકા આત્માનઃ । તાવેતાવર્કાશ્વમેધૌ, સો પુનરેકૈવ દેવતા
ભવતિ, મૃત્યુરેવાપ પુનર્મૃત્યું જયતિ, નૈનં મૃત્યુરાપ્નોતિ, મૃત્યુરસ્યાત્મા
ભવતિ સર્વમાયુરેતિ એતાસાં દેવતાનામેકો ભવતિ, ય એવં વેદ ।

ch3 = SBM 14.4.1.1-33 = SBK16.3.3.1-23

pMK1

દ્વયા હ પ્રાજાપત્યા, દેવાશ્ચાસુરાશ્ચ । તતઃ કાનીયસા
એવ દેવા, જ્યાયસા અસુરાઃ । ત એષુ લોકેષ્વસ્પર્ધન્ત ।

pMK2

તે હ દેવા ઊચુઃ હન્તાસુરાન્યજ્ઞ ઉદ્ગીથેનાત્યયામેતિ ।

pM3/k2

તે હ વાચમૂચુઃ ત્વં ન ઉદ્ગાયેતિ । તથેતિ । તેભ્યો વાગુદગાયદ્ । યો
વાચિ ભોગસ્તં દેવેભ્ય આગાયદ્ યત્કલ્યાણં વદતિ તદાત્મને । તેઽવિદુઃ
અનેન વૈ ન ઉદ્ગાત્રાત્યેષ્યન્તીતિ । તમભિદ્રુત્ય પાપ્મનાવિધ્યન્ । સ યઃ સ
પાપ્મા યદેવેદમપ્રતિરૂપં વદતિ, સ એવ સ પાપ્મા ।

pM4/k3

અથ હ પ્રાણમૂચુઃ ત્વં ન ઉદ્ગાયેતિ । તથેતિ । તેભ્યઃ પ્રાણ ઉદગાયદ્ ।
યઃ પ્રાણે ભોગસ્તં દેવેભ્ય આગાયદ્ યત્કલ્યાણં જિઘ્રતિ તદાત્મને ।
તેઽવિદુરનેન વૈ ન ઉદ્ગાત્રાત્યેષ્યન્તીતિ । તમભિદ્રુત્ય પાપ્મનાવિધ્યન્ ।
સ યઃ સ પાપ્મા યદેવેદમપ્રતિરૂપં જિઘ્રતિ, સ એવ સ પાપ્મા ।

pM5/k4

અથ હ ચક્ષુરૂચુઃ ત્વં ન ઉદ્ગાયેતિ । તથેતિ । તેભ્યશ્ચક્ષુરુદગાયદ્ ।
યશ્ચક્ષુષિ ભોગસ્તં દેવેભ્ય આગાયદ્ યત્કલ્યાણં પશ્યતિ તદાત્મને ।
તેઽવિદુરનેન વૈ ન ઉદ્ગાત્રાત્યેષ્યન્તીતિ । તમભિદ્રુત્ય પાપ્મનાવિધ્યન્ ।
સ યઃ સ પાપ્મા યદેવેદમપ્રતિરૂપં પશ્યતિ, સ એવ સ પાપ્મા ।

pM6/k5

અથ હ શ્રોત્રમૂચુઃ ત્વં ન ઉદ્ગાયેતિ । તથેતિ । તેભ્યઃ શ્રોત્રમુદગાયદ્ ।
યઃ શ્રોત્રે ભોગસ્તં દેવેભ્ય આગાયદ્ યત્કલ્યાણꣳ શૃણોતિ તદાત્મને ।
તેઽવિદુરનેન વૈ ન ઉદ્ગાત્રાત્યેષ્યન્તીતિ । તમભિદ્રુત્ય પાપ્મનાવિધ્યન્ ।
સ યઃ સ પાપ્મા યદેવેદમપ્રતિરૂપꣳ શૃણોતિ, સ એવ સ પાપ્મા ।

pM7/k5

અથ હ મન ઊચુઃ ત્વં ન ઉદ્ગાયેતિ । તથેતિ । તેભ્યો મન ઉદગાયદ્ । યો
મનસિ ભોગસ્તં દેવેભ્ય આગાયદ્ યત્કલ્યાણꣳ સઙ્કલ્પયતિ તદાત્મને ।
તેઽવિદુરનેન વૈ ન ઉદ્ગાત્રાત્યેષ્યન્તીતિ । તમભિદ્રુત્ય પાપ્મનાવિધ્યન્ ।
સ યઃ સ પાપ્મા યદેવેદમપ્રતિરૂપꣳ સઙ્કલ્પયતિ, સ એવ સ
પાપ્મૈવમુ ખલ્વેતા
દેવતાઃ પાપ્મભિરુપાસૃજન્
એવમેનાઃ પાપ્મનાવિધ્યન્ ।

pM8/k7

અથ હેમમાસન્યં પ્રાણમૂચુઃ ત્વં ન ઉદ્ગાયેતિ । તથેતિ । તેભ્ય એષ

પ્રાણ ઉદગાયત્ । તેઽવિદુરનેન વૈ ન ઉદ્ગાત્રાત્યેષ્યન્તીતિ । તમભિદ્રુત્ય પાપ્મનાવિવ્યત્સન્ । સ યથાશ્માનમૃત્વા લોષ્ટો
વિધ્વꣳસેતૈવꣳ હૈવ વિધ્વꣳસમાના વિષ્વઞ્ચો વિનેશુઃ ।
તતો દેવા અભવન્ પરાસુરા । ભવત્યાત્મના, પરાસ્ય દ્વિષન્ભ્રાતૃવ્યો ભવતિ, ય એવં વેદ ।

pM9/k8

તે હોચુઃ ક્વ નુ સોઽભૂદ્ યો ન ઇત્થમસક્તેતિ । અયમાસ્યેઽન્તરિતિ, સોઽયાસ્ય; આઙ્ગિરસો, અઙ્ગાનાꣳ હિ રસઃ ।

pM10/k9

સા વા એષા દેવતા દૂર્નામ, દૂરꣳ હ્યસ્યા મૃત્યુઃ । દૂરꣳ હ વા અસ્માન્મૃત્યુર્ભવતિ, ય એવં વેદ ।

pM11/k10

સા વા એષા દેવતૈતાસાં દેવતાનાં પાપ્માનં મૃત્યુમપહત્ય, યત્રાસાં દિશામન્તઃ તદ્ગમયાં ચકાર, તદાસાં પાપ્મનો વિન્યદધાત્ । તસ્માન્ન જનમિયાન્ નાન્તમિયાન્ નેત્પાપ્માનં મૃત્યુમન્વવાયાનીતિ ।

pM12/k11

સા વા એષા દેવતૈતાસાં દેવતાનાં
પાપ્માનં મૃત્યુમપહત્યાથૈના મૃત્યુમત્યવહત્ ।

pM13/k12

સા વૈ વાચમેવ પ્રથમામત્યવહત્ । સા યદા મૃત્યુમત્યમુચ્યત, સોઽગ્નિરભવત્; સોઽયમગ્નિઃ પરેણ મૃત્યુમતિક્રાન્તો દીપ્યતે ।

pM14/k13

અથ પ્રાણમત્યવહત્ । સ યદા મૃત્યુમત્યમુચ્યત, સ વાયુરભવત્; સોઽયં વાયુઃ પરેણ મૃત્યુમતિક્રાન્તઃ પવતે ।

pM15/k14

અથ ચક્ષુરત્યવહત્ । તદ્યદા મૃત્યુમત્યમુચ્યત, સ આદિત્યોઽભવત્; સોઽસાવાદિત્યઃ પરેણ મૃત્યુમતિક્રાન્તસ્તપતિ ।

pM16/k15

અથ શ્રોત્રમત્યવહત્ । તદ્યદા મૃત્યુમત્યમુચ્યત, તા દિશોઽભવન્; તા

ઇમા દિશઃ પરેણ મૃત્યુમતિક્રાન્તાઃ ।

pM17/k16

અથ મનોઽત્યવહત્ । તદ્યદા મૃત્યુમત્યમુચ્યત, સ ચન્દ્રમા અભવત્;
સોઽસૌ ચન્દ્રઃ પરેણ મૃત્યુમતિક્રાન્તો ભાતિ । એવꣳ હ વા એનમેષા
દેવતા મૃત્યુમતિવહતિ, ય એવં વેદ ।

pM18/k17

અથાત્મનેઽન્નાદ્યમાગાયદ્ । યદ્ધિ કિઙ્ચાન્નમદ્યતે, અનેનૈવ તદદ્યત;
ઇહ પ્રતિતિષ્ઠતિ ।

pM19/k18

તે દેવા અબ્રુવન્ એતાવદ્વા ઇદꣳ સર્વં યદન્નં, તદાત્મન આગાસીરનુ
નોઽસ્મિન્નન્ન આભજસ્વેતિ । તે વૈ માભિસંવિશતેતિ । તથેતિ । તꣳ
સમન્તં પરિણ્યવિશન્ત । તસ્માદ્યદનેનાન્નમત્તિ, તેનૈતાસ્તૃપ્યન્તિ ।
એવꣳ હ વા એનꣳ સ્વા અભિસંવિશન્તિ, ભર્તા સ્વાનાꣳ શ્રેષ્ઠઃ પુરએતા
ભવત્યન્નાદોઽધિપતિઃ ય એવં વેદ ।

pM20/k18

ય ઉ હૈવંવિદꣳ સ્વેષુ પ્રતિપ્રતિર્બુભૂષતિ, ન હૈવાલં ભાર્યેભ્યો
ભવતિ અથ ય એવૈતમનુભવતિ, યો વૈતમનુ ભાર્યાન્બુભૂર્ષતિ, સ
હૈવાલં ભાર્યેભ્યો ભવતિ ।

pM21/k19

સોઽયાસ્ય આઙ્ગિરસો, અઙ્ગાનાꣳ હિ રસઃ । પ્રાણો વા અઙ્ગાનાꣳ રસઃ ।
પ્રાણો હિ વા અઙ્ગાનાꣳ રસઃ તસ્માદ્યસ્માત્કસ્માચ્ચાઙ્ગાત્પ્રાણ ઉત્ક્રામતિ,
તદેવ તચ્છુષ્યતિ એષ હિ વા અઙ્ગાનાꣳ રસઃ ।

pM22/k20

એષ ઉ એવ બૃહસ્પતિઃ વાગ્વૈ બૃહતી, તસ્યા એષ પતિઃ તસ્માદુ
બૃહસ્પતિઃ ।

pM23/k21

એષ ઉ એવ બ્રાહ્મણસ્પતિઃ વાગ્વૈ બ્રહ્મ, તસ્યા એષ પતિઃ તસ્માદુ
બ્રાહ્મણસ્પતિઃ ।

pM24/k22

એષ ઉ એવ સામ; વાગ્વૈ સામૈષ સા ચામશ્ચેતિ, તત્સામ્નઃ
સામત્વમ્ । યદ્વેવ સમઃ પ્લુષિણા, સમો મશકેન, સમો નાગેન, સમ
એભિસ્ત્રિભિર્લોકૈઃ, સમોઽનેન સર્વેણ, તસ્માદ્વેવ સામાશ્નુતે સામ્નઃ
સાયુજ્યꣳ સલોકતાં, ય એવમેતત્સામ વેદ ।

pM25/k23

એષ ઉ વા ઉદ્ગીથઃ । પ્રાણો વા ઉત્ પ્રાણેન હીદꣳ સર્વમુત્તબ્ધમ્ ।
વાગેવ ગીથોચ્ચ ગીથા ચેતિ, સ ઉદ્ગીથઃ ।

pM26/k24

તદ્ધાપિ બ્રહ્મદત્તશ્ચૈકિતાનેયો રાજાનં ભક્ષયન્નુવાચાયં ત્યસ્ય રાજા
મૂર્ધાનં વિપાતયતાદ્ યદિતોઽયાસ્ય આઙ્ગિરસોઽન્યેનોદગાયદિતિ । વાચા
ચ હ્યેવ સ પ્રાણેન ચોદગાયદિતિ ।

pM27/k25

તસ્ય હૈતસ્ય સામ્નો યઃ સ્વં વેદ, ભવતિ હાસ્ય સ્વમ્ । તસ્ય વૈ
સ્વર એવ સ્વમ્ । તસ્માદાર્ત્વિજ્યં કરિષ્યન્વાચિ સ્વરમિચ્છેત, તયા વાચા
સ્વરસમ્પન્નયાર્ત્વિજ્યં કુર્યાત્ । તસ્માદ્યજ્ઞે સ્વરવન્તં દિદૃક્ષન્ત એવાથો
યસ્ય સ્વં ભવતિ ।
ભવતિ હાસ્ય સ્વં, ય એવમેતત્સામ્નઃ સ્વં વેદ ।

pM28/k26

તસ્ય હૈતસ્ય સામ્નો યઃ સુવર્ણં વેદ, ભવતિ હાસ્ય સુવર્ણમ્ । તસ્ય વૈ
સ્વર એવ સુવર્ણમ્ । ભવતિ હાસ્ય સુવર્ણં, ય એવમેતત્સામ્નઃ સુવર્ણં
વેદ ।

pM29/k27

તસ્ય હૈતસ્ય સામ્નો યઃ પ્રતિષ્ઠાં વેદ, પ્રતિ હ તિષ્ઠતિ । તસ્ય વૈ
વાગેવ પ્રતિષ્ઠા, વાચિ હિ ખલ્વેષ એતત્પ્રાણઃ પ્રતિષ્ઠિતો ગીયતે,
અન્ન ઇત્યુ હૈક આહુઃ ।

pM30/k28

અથાતઃ પવમાનાનામેવાભ્યારોહઃ । સ વૈ ખલુ પ્રસ્તોતા સામ પ્રસ્તૌતિ ।
સ યત્ર પ્રસ્તુયાત્ તદેતાનિ જપેદસતો મા સદ્ગમય તમસો મા જ્યોતિર્ગમય,
મૃત્યોર્માઽમૃતં ગમયેતિ ।

pM31/k28

સ યદાહાસતો મા સદ્ગમયેતિ, મૃત્યુર્વા અસત્ સદમૃતમ્ મૃત્યોર્માઽમૃતં ગમયામૃતં મા કુર્વિત્યેવૈતદાહ ।

pM32/k28

તમસો મા જ્યોતિર્ગમયેતિ, મૃત્યુર્વૈ તમો, જ્યોતિરમૃતમ્ મૃત્યોર્માઽમૃતં ગમયામૃતં મા કુર્વિત્યેવૈતદાહ । મૃત્યોર્માઽમૃતં ગમયેતિ, નાત્ર તિરોહિતમિવાસ્તિ ।

pM33/k28

અથ યાનીતરાણિ સ્તોત્રાણિ, તેષ્વાત્મનેઽન્નાદ્યમાગાયેત્; તસ્માદુ તેષુ વરં વૃણીત, યં કામં કામયેત, તँ । સ એષ એવંવિદુદ્ગાતાત્મને વા યજમાનાય
વા યં કામં કામયતે,
તમાગાયતિ । તદ્ધૈતલ્ લોકજિદેવ, ન હૈવાલોક્યતાયા આશાસ્તિ, ય એવમેતત્સામ વેદ ।

ch4 = SBM 14.4.2.1-31 = SBK16.3.4.1-17

pMK1

આત્મૈવેદમગ્ર આસીત્પુરુષવિધઃ । સોઽનુવીક્ષ્ય નાન્યદાત્મનોઽપશ્યત્ । સોઽહમસ્મીત્યગ્રે વ્યાહરત્ । તતોઽહન્નામાભવત્ । તસ્માદપ્યેતર્હ્યામન્ત્રિતોઽહમયમિત્યેવાગ્ર ઉક્ત્વાથાન્યન્નામ
પ્રબ્રૂતે યદસ્ય ભવતિ ।

pM2/k1

સ યત્પૂર્વોઽસ્માત્સર્વસ્માત્સર્વાન્પાપ્મન ઔષત્ તસ્માત્પુરુષ । ઓષતિ હ વૈ સ તં, યોઽસ્માત્પૂર્વો બુભૂષતિ, ય એવં વેદ ।

pM3/k2

સોઽબિભેત્; તસ્માદેકાકી બિભેતિ । સ હાયમીક્ષાં ચક્રે યન્મદન્યન્નાસ્તિ, કસ્માન્નુ બિભેમીતિ । તત એવાસ્ય ભયં વીયાય । કસ્માદ્ધ્યભેષ્યદ્ દ્વિતીયાદ્વૈ ભયં ભવતિ ।

pM4/k3

સ વૈ નૈવ રેમે; તસ્માદેકાકી ન રમતે । સ દ્વિતીયમૈચ્છત્ । સ હૈતાવાનાસ યથા સ્ત્રીપુમાँસૌ સમ્પરિષ્વક્તૌ ।

pM5/k3

સ ઇમમેવાત્માનં દ્વેધાપાતયત્; તતઃ પતિશ્ચ પત્ની ચાભવતામ્ ।
તસ્માદિદમર્ધબૃગલમિવ સ્વ ઇતિ હ સ્માહ યાજ્ઞવલ્ક્યઃ । તસ્માદયમાકાશઃ
સ્ત્રિયા પૂર્યત એવ । તાꣳ સમભવત્ તતો મનુષ્યા અજાયન્ત ।

pM6/k4

સો હેયમીક્ષાં ચક્રે: કથં નુ માત્મન એવ જનયિત્વા સમ્ભવતિ । હન્ત
તિરોઽસાનીતિ ।

pM7/k4

સા ગૌરભવદ્ વૃષભ ઇતરસ્; તાꣳ સમેવાભવત્ તતો ગાવોઽજાયન્ત ।

pM8/k4

વડવેતરાભવદશ્વવૃષ ઇતરો; ગર્દભીતરા, ગર્દભ ઇતરસ્; તાꣳ
સમેવાભવત્ તત એકશફમજાયત ।

pM9/k4

અજેતરાભવદ્ બસ્ત ઇતરો; અવિરિતરા, મેષ ઇતરસ્; તાꣳ સમેવાભવત્
તતોઽજાવયોઽજાયન્તૈવમેવ યદિદં કિઙ્ચ મિથુનમા
પિપીલિકાભ્યઃ
તત્સર્વમસૃજત ।

pM10/k5

સોઽવેદહં વાવ સૃષ્ટિરસ્મિ અહꣳ હીદꣳ સર્વમસૃક્ષીતિ ।
તતઃ સૃષ્ટિરભવત્ । સૃષ્ટ્યાꣳ હાસ્યૈતસ્યાં ભવતિ, ય એવં વેદ ।

pM11/k6

અથેત્યભ્યમન્થત્ । સ મુખાચ્ચ યોનેર્હસ્તાભ્યાં ચાગ્નિમસૃજત ।
તસ્માદેતદુભયમલોમકમન્તરતો, અલોમકા હિ યોનિરન્તરતઃ ।

pM12/k6

તદ્યદિદમાહુરમું યજામું યજેત્યેકૈકં દેવમ્ એતસ્યૈવ સા વિસૃષ્ટિઃ
એષ ઉ હ્યેવ સર્વે દેવા ।

pM13/k6

અથ યત્કિઙ્ચેદમાર્દ્રં, તદ્રેતસોઽસૃજત; તદુ સોમ । એતાવદ્વા
ઇદꣳ સર્વમન્નં ચૈવાન્નાદશ્ચ; સોમ એવાન્નમ્ અગ્નિરન્નાદઃ ।

pM14/k6

સૈષા બ્રહ્મણોऽતિસૃષ્ટિઃ યચ્છ્રેયસો દેવાનસૃજતાથ યન્મર્ત્યઃ
સન્નમૃતાનસૃજત,
તસ્માદતિસૃષ્ટિરતિસૃષ્ટ્યાँ હાસ્યૈતસ્યાં ભવતિ, ય એવં વેદ ।

pM15/k7

તદ્ધેદં તર્હ્યવ્યાકૃતમાસીત્ । તન્નામરૂપાભ્યામેવ વ્યાક્રિયતાસૌ
નામાયમિદँ રૂપ ઇતિ । તદિદમપ્યેતર્હિ નામરૂપાભ્યામેવ
વ્યાક્રિયત અસૌ નામાયમિદँ રૂપ ઇતિ ।

pM16/k7

સ એષ ઇહ પ્રવિષ્ટ આ નખાગ્રેભ્યો । યથા ક્ષુરઃ ક્ષુરધાનેऽવહિતઃ
સ્યાદ્ વિશ્વમ્ભરો વા વિશ્વમ્ભરકુલાયે, તં ન પશ્યન્તિ અકૃત્સ્નો હિ સઃ;

pM17/k7

પ્રાણન્નેવ પ્રાણો નામ ભવતિ, વદન્વાક્ પશ્યંશ્ચક્ષુઃ,
શ઼ૃણ્વઞ્શ્રોત્રં, મન્વાનો મનઃ । તાન્યસ્યૈતાનિ કર્મનામાન્યેવ । સ
યોऽત એકૈકમુપાસ્તે, ન સ વેદાકૃત્સ્નો હ્યેષોऽત એકૈકેન ભવતિ ।

pM18/k7

આત્મેત્યેવોપાસીતાત્ર હ્યેતે સર્વ એકં ભવન્તિ । તદેતત્પદનીયમસ્ય
સર્વસ્ય
યદયમાત્માનેન હ્યેતત્સર્વં વેદ ।
યથા હ વૈ પદેનાનુવિન્દેદેવં કીર્તિँ શ્લોકં વિન્દતે, ય એવં વેદ ।

pM19/k8

તદેતત્પ્રેયઃ પુત્રાત્ પ્રેયો વિત્તાત્ પ્રેયોऽન્યસ્માત્સર્વસ્માદન્તરતરં,
યદયમાત્મા । સ યોऽન્યમાત્મનઃ પ્રિયં બ્રુવાણં બ્રૂયાત્ પ્રિયँ
રોત્સ્યતીતીશ્વરો હ તથૈવ સ્યાદ્ । આત્માનમેવ પ્રિયમુપાસીત । સ ય
આત્માનમેવ પ્રિયમુપાસ્તે, ન હાસ્ય પ્રિયં પ્રમાયુકં ભવતિ ।

pM20/k9

તદાહુઃ યદ્બ્રહ્મવિદ્યયા સર્વં ભવિષ્યન્તો મનુષ્યા મન્યન્તે, કિમુ
તદ્બ્રહ્માવેદ્ યસ્માત્તત્સર્વમભવદિતિ ।

pM21/k10

બ્રહ્મ વા ઇદમગ્ર આસીત્ । તદાત્માનમેવાવેદહં બ્રહ્માસ્મીતિ;

તસ્માત્તત્સર્વમભવત્ । તદ્યો-યો દેવાનાં પ્રત્યબુધ્યત, સ એવ તદભવત્
તથર્ષીનાં, તથા મનુષ્યાણામ્ ।

pM22/k10

તદ્ધૈતત્પશ્યન્નૃષિર્વામદેવઃ પ્રતિપેદેઽહં મનુરભવꣳ
સૂર્યશ્ચેતિ । તદિદમપ્યેતર્હિ ય એવં વેદાહં બ્રહ્માસ્મીતિ, સ
ઇદꣳ સર્વં ભવતિ, તસ્ય હ ન દેવાશ્ચનાભૂત્યા ઈશત, આત્મા હ્યેષાꣳ
સ ભવતિ । અથ યોઽન્યાં દેવતામુપાસ્તેઽન્યોઽસાઉ અન્યોઽહમસ્મીતિ,
ન સ વેદ । યથા પશુરેવꣳ સ દેવાનામ્ । યથા હ વૈ બહવઃ
પશવો મનુષ્યં ભુઞ્જ્યુઃ એવમેકૈકઃ પુરુષો દેવાન્ભુનક્તિ । એકસ્મિન્નેવ
પશાવાદીયમાનેઽપ્રિયં ભવતિ, કિમુ બહુષુ; તસ્માદેષાં તન્ન પ્રિયં
યદેતન્મનુષ્યા વિદ્યુઃ ।

pM23/k11

બ્રહ્મ વા ઇદમગ્ર આસીદેકમેવ । તદેકꣳ સન્ન વ્યભવત્ । તચ્છ્રેયો
રૂપમત્યસૃજત ક્ષત્રં, યાન્યેતાનિ દેવત્રા ક્ષત્રાણીન્દ્રો વરુણઃ સોમો
રુદ્રઃ પર્જન્યો યમો મૃત્યુરીશાન ઇતિ ।
તસ્માત્ક્ષત્રાત્પરં નાસ્તિ; તસ્માદ્! બ્રાહ્મણઃ ક્ષત્રિયં અધસ્તાદુપાસ્તે
રાજસૂયે । ક્ષત્ર એવ તદ્યશો દધાતિ, સૈષા ક્ષત્રસ્ય યોનિર્યદ્બ્રહ્મ ।
તસ્માદ્યદ્યપિ રાજા પરમતાં ગચ્છતિ, બ્રહ્મૈવાન્તત ઉપનિશ્રયતિ સ્વાં
યોનિમ્ । ય ઉ એનꣳ હિનસ્તિ, સ્વાꣳ સ યોનિમૃચ્છતિ । સ પાપીયાન્ભવતિ,
યથા શ્રેયાꣳસꣳ હિꣳસિત્વા ।

pM24/k12

સ નૈવ વ્યભવત્ । સ વિશમસૃજત, યાન્યેતાનિ દેવજાતાનિ ગણશ
આખ્યાયન્તે, વસવો રુદ્રા આદિત્યા વિશ્વે દેવા મરુત ઇતિ ।

pM25/k13

સ નૈવ વ્યભવત્ । સ શૌદ્રં વર્ણમસૃજત પૂષણમ્ । ઇયં વૈ
પૂષેયꣳ હીદꣳ સર્વં
પુષ્યતિ યદિદં કિઞ્ચ ।

pM26/k14

સ નૈવ વ્યભવત્ । તચ્છ્રેયો રૂપમત્યસૃજત ધર્મમ્ ।
તદેતત્ક્ષત્રસ્ય ક્ષત્રં યદ્ધર્મઃ । તસ્માદ્ધર્માત્પરં નાસ્તિ । અથો

અબલીયાન્બલીયાꣳ સમાશꣳ સતે
ધર્મેણ યથા રાજ્ઞૈવમ્ ।
યો વૈ સ ધર્મઃ, સત્યં વૈ તત્ । તસ્માત્સત્યં વદન્તમાહુઃ ધર્મં
વદતીતિ, ધર્મં વા વદન્તꣳ : સત્યં વદતીતિ એતદ્ધ્યેવૈતદુભયં
ભવતિ ।

pM27/k15
તદેતદ્બ્રહ્મ ક્ષત્રં વિટ્ શૂદ્રઃ । તદગ્નિનૈવ દેવેષુ બ્રહ્માભવદ્
બ્રાહ્મણો મનુષ્યેષુ, ક્ષત્રિયેણ ક્ષત્રિયો, વૈશ્યેન વૈશ્યઃ, શૂદ્રેણ શૂદ્રઃ ।
તસ્માદગ્નાવેવ દેવેષુ લોકમિચ્છન્તે, બ્રાહ્મણે મનુષ્યેષુ એતાભ્યાꣳ હિ
રૂપાભ્યાં બ્રહ્માભવત્ ।

pM28/k15
અથ યો હ વા અસ્માલ્ લોકાત્સ્વં લોકમદૃષ્ટ્વા પ્રૈતિ, સ એનમવિદિતો
ન ભુનક્તિ; યથા વેદો વાનનૂક્તોઽન્યદ્વા કર્માકૃતમ્ । યદિ હ વા
અપ્યનેવંવિન્મહત્પુણ્યં કર્મ કરોતિ, તદ્ધાસ્યાન્તતઃ ક્ષીયત એવાત્માનમેવ
લોકમુપાસીત । સ ય આત્માનમેવ લોકમુપાસ્તે, ન હાસ્ય કર્મ ક્ષીયતે ।
અસ્માદ્ધ્યેવાત્મનો યદ્-યત્કામયતે, તત્-તત્સૃજતે ।

pM29/k16
અથો અયં વા આત્મા સર્વેષાં ભૂતાનાં લોકઃ; સ યજ્ જુહોતિ, યદ્યજતે
તેન દેવાનાં લોકો; અથ યદનુબ્રૂતે, તેનર્ષીણામ્; અથ યત્પ્રજામિચ્છતે,
યત્પિતૃભ્યો નિપૃણાતિ, તેન પિતૄણામ્; અથ યન્મનુષ્યાન્વાસયતે,
યદેભ્યોઽશનં દદાતિ, તેન મનુષ્યાણામ્; અથ યત્પશુભ્યસ્તૃણોદકં
વિન્દતિ, તેન પશૂનાં; યદસ્ય ગૃહેષુ શ્વાપદા વયાꣳસ્યા
પિપીલિકાભ્ય ઉપજીવન્તિ,
તેન તેષાં લોકો । યથા હ વૈ સ્વાય લોકાયારિષ્ટિમિચ્છેદેવꣳ
હૈવંવિદે સર્વદા સર્વાણિ ભૂતાન્યરિષ્ટિમિચ્છન્તિ । તદ્વા એતદ્વિદિતં
મીમાꣳસિતમ્ ।

pM30/k17
આત્મૈવેદમગ્ર આસીદેક એવ । સોઽકામયતઃ જાયા મે સ્યાદથ પ્રજાયેયાથ
વિત્તં મે સ્યાદથ કર્મ કુર્વીયેતિ । એતાવાન્વૈ કામો નેચ્છꣳશ્ચનાતો
ભૂયો વિન્દેત્ । તસ્માદપ્યેતર્હ્યેકાકી કામયતેઃ જાયા મે સ્યાદથ પ્રજાયેયાથ

વિત્તં મે સ્યાદથ કર્મ કુર્વીયેતિ । સ યાવદપ્યેતેષામેકૈકં ન પ્રાપ્નોતિ
અકૃત્સ્ન એવ તાવન્મન્યતે । તસ્યો કૃત્સ્નતા ।

pM31/k17

મન એવાસ્યાત્મા; વાગ્જાયા; પ્રાણઃ પ્રજા; ચક્ષુર્માનુષં વિત્તં, ચક્ષુષા
હિ તદ્વિન્દતિ; શ્રોત્રં દૈવં, શ્રોત્રેણ હિ તચ્છૃણોતિ આત્મૈવાસ્ય
કર્માત્મના હિ કર્મ કરોતિ । સ એષ પાઙ્ક્તો યજ્ઞઃ, પાઙ્ક્તઃ પશુઃ,
પાઙ્ક્તઃ પુરુષઃ, પાઙ્ક્તમિદꣳ સર્વં યદિદં કિઞ્ચ । તદિદꣳ
સર્વમાપ્નોતિ, ય એવં વેદ ।

ch5 = SBM 14.4.3.1-34= SBK16.3.5.1-23

pMK1

યત્સપ્તાન્નાનિ મેધયા તપસાજનયત્પિતૈ- -કમસ્ય સાધારણં,
દ્વે દેવાનભાજયત્ । ત્રીણ્યાત્મનેઽકુરુત, પશુભ્ય એકં પ્રાયચ્છત્;
તસ્મિન્ત્સર્વં પ્રતિષ્ઠિતં, યચ્ચ પ્રાણિતિ યચ્ચ ન । કસ્માત્તાનિ ન
ક્ષીયન્તે, અદ્યમાનાનિ સર્વદા । યો વૈ તામક્ષિતિં વેદ, સોઽન્નમત્તિ પ્રતીકેન,
સ દેવાનપિગચ્છતિ, સ ઊર્જમુપજીવતીતિ શ્લોકાઃ ।

pMK2

યત્સપ્તાન્નાનિ મેધયા તપસાજનયત્પિતેતિ, મેધયા હિ
તપસાજનયત્પિતૈકમસ્ય
સાધારણમિતીદમેવાસ્ય તત્સાધારણમન્નં,
યદિદમદ્યતે । સ ય એતદુપાસ્તે, ન સ પાપ્મનો વ્યાવર્તતે; મિશ્રꣳ
હ્યેતત્ ।

pM3/k2

દ્વે દેવાનભાજયદિતિ, હુતં ચ પ્રહુતં ચ; તસ્માદ્દેવેભ્યો જુહ્વતિ ચ પ્ર
ચ જુહ્વતિ । અથો આહુઃ દર્શપૂર્ણમાસાવિતિ । તસ્માન્નેષ્ટિયાજુકઃ સ્યાત્ ।

pM4/k2

પશુભ્ય એકં પ્રાયચ્છદિતિ, તત્પયઃ; પયો હ્યેવાગ્રે મનુષ્યાશ્ચ
પશવશ્ચોપજીવન્તિ । તસ્માત્કુમારં જાતં ઘૃતં વૈવાગ્રે પ્રતિલેહયન્તિ,
સ્તનં વાનુધાપયન્તિ;

pM5/k2

અથ વત્સં જાતમાહુરતૃણાદ ઇતિ । તસ્મિન્ત્સર્વં પ્રતિષ્ઠિતં, યચ્ચ

પ્રાણિતિ યચ્ચ નેતિ, પયસિ હીદꣳ સર્વં પ્રતિષ્ઠિતં, યચ્ચ પ્રાણિતિ યચ્ચ ન ।

pM6/k2

તદ્યદિદમાહુઃ સંવત્સરં પયસા જુહ્વદપ પુનર્મૃત્યું જયતીતિ, ન તથા વિદ્યાદ્ । યદહરેવ જુહોતિ, તદહઃ પુનર્મૃત્યુમપજયત્યેવં વિદ્વાન્ત્; સર્વꣳ હિ દેવેભ્યોઽન્નાદ્યં પ્રયચ્છતિ । કસ્માત્તાનિ ન ક્ષીયન્તેઽદ્યમાનાનિ સર્વદેતિ ।

pM7/k2

પુરુષો વા અક્ષિતિઃ, સ હીદમન્નં પુનઃ-પુનર્જનયતે । યો વૈ તામક્ષિતિં વેદેતિ, પુરુષો વા અક્ષિતિઃ । સ હીદમન્નં ધિયા-ધિયા જનયતે કર્મભિઃ યદ્ધૈતન્ન કુર્યાત્ ક્ષીયેત હ । સોઽન્નમત્તિ પ્રતીકેનેતિ, મુખં પ્રતીકં, મુખેનેત્યેતત્ । સ દેવાનપિગચ્છતિ, સ ઊર્જમુપજીવતીતિ પ્રશꣳસા ।

pM8/k3

ત્રીણ્યાત્મનેઽકુરુતેતિઃ મનો વાચં પ્રાણં; તાન્યાત્મનેઽકુરુતાન્યત્રમના અભૂવં, નાદર્શમ્; અન્યત્રમના અભૂવં, નાશ્રૌષમિતિઃ મનસા હ્યેવ પશ્યતિ, મનસા શꣳૃણોતિ ।

pM9/k3

કામઃ સઙ્કલ્પો વિચિકિત્સા શ્રદ્ધાશ્રદ્ધા
ધૃતિરધૃતિર્હ્રીર્ધીર્ભીરિત્યેતત્સર્વં મન એવ ।
તસ્માદપિ પૃષ્ઠત ઉપસ્પૃષ્ટો મનસા વિજાનાતિ ।

pM10/k3

યઃ કશ્ચ શબ્દો, વાગેવ સૈષા હ્યન્તં આયત્તૈષા હિ ન ।
પ્રાણોઽપાનો વ્યાન ઉદાનઃ સમાનોઽન
ઇત્યેતત્સર્વં પ્રાણ એવૈતન્મયો વા અયમાત્માઃ
વાઙ્મયો, મનોમયઃ, પ્રાણમયઃ ।

pM11/k4

ત્રયો લોકા એત એવઃ વાગેવાયં લોકો, મનોઽન્તરિક્ષલોકઃ, પ્રાણોઽસૌ લોકઃ ।

pM12/k5

ત્રયો વેદા એત એવઃ વાગેવર્ગ્વેદો, મનો યજુર્વેદઃ, પ્રાણઃ સામવેદઃ ।

pM13/k6

pMK1

દેવા પિતરો મનુષ્યા એત એવઃ વાગેવ
દેવા, મનઃ પિતરઃ, પ્રાણો માનુષ્યાઃ ।

pM14/k7

પિતા માતા પ્રજૈત એવઃ મન એવ પિતા, વાઙ્ માતા, પ્રાણઃ પ્રજા ।

pM15/k8

વિજ્ઞાતં વિજિજ્ઞાસ્યમવિજ્ઞાતમેત એવઃ યત્કિઙ્ચ વિજ્ઞાતં વાચસ્તદ્રૂપમ્
વાગ્ઘિ વિજ્ઞાતા, વાગેનં તદ્ભૂત્વાવતિ ।

pM16/k9

યત્કિઙ્ચ વિજિજ્ઞાસ્યં મનસસ્તદ્રૂપમ્ મનો હિ વિજિજ્ઞાસ્યં, મન એનં
તદ્ભૂત્વાવતિ ।

pM17/k10

યત્કિઙ્ચાવિજ્ઞાતં પ્રાણસ્ય તદ્રૂપમ્ પ્રાણો હ્યવિજ્ઞાતઃ, પ્રાણ એનં
તદ્ભૂત્વાવતિ ।

pM18/k11

તસ્યૈ વાચઃ પૃથિવી શરીરં, જ્યોતી રૂપમયમગ્નિઃ । તદ્યાવત્યેવ
વાક્ તાવતી પૃથિવી, તાવાનયમગ્નિઃ ।

pM19/k12

અથૈતસ્ય મનસો દ્યૌઃ શરીરં, જ્યોતી રૂપમસાવાદિત્યઃ । તદ્યાવદેવ
મનસ્તાવતી દ્યૌઃ તાવાનસાવાદિત્યઃ । તૌ મિથુનꣳ સમૈતામ્ । તતઃ
પ્રાણોઽજાયત । સ ઇન્દ્રઃ, સ એષોઽસપત્નો । દ્વિતીયો વૈ સપત્નો । નાસ્ય
સપત્નો ભવતિ, ય એવં વેદ ।

pM20/k13

અથૈતસ્ય પ્રાણસ્યાપઃ શરીરં, જ્યોતી રૂપમસૌ ચન્દ્રઃ । તદ્યાવાનેવ
પ્રાણઃ તાવત્ય આપઃ તાવાનસૌ ચન્દ્રઃ ।

pM21/k13

ત એતે સર્વ એવ સમાઃ, સર્વેઽનન્તાઃ । સ યો હૈતાનન્તવત ઉપાસ્તે,

અન્તવન્તꣳ સ લોકં જયતિ અથ યો હૈતાનનન્તાનુપાસ્તે, અનન્તꣳ સ લોકં જયતિ ।

pM22/k14

સ એષ સંવત્સરઃ પ્રજાપતિષ્ષોડશકલઃ । તસ્ય રાત્રય એવ પઙ્ચદશ કલા; ધ્રુવૈવાસ્ય ષોડશી કલા । સ રાત્રિભિરેવા ચ પૂર્યતે, અપ ચ ક્ષીયતે । સોઽમાવાસ્યાꣳ રાત્રિમેતયા ષોડશ્યા કલયા સર્વમિદં પ્રાણભૃદનુપ્રવિશ્ય, તતઃ પ્રાતર્જાયતે । તસ્માદેતાꣳ રાત્રિં પ્રાણભૃતઃ પ્રાણં ન વિચ્છિન્દ્યાદપિ કૃકલાસસ્યૈતસ્યા એવ દેવતાયા અપચિત્યૈ ।

pM23/k15

યો વૈ સ સંવત્સરઃ પ્રજાપતિષ્ષોડશકાલો, અયમેવ સ યોઽયમેવંવિત્પુરુષઃ । તસ્ય વિત્તમેવ પઙ્ચદશ કલાઃ આત્મૈવાસ્ય ષોડશી કલા । સ વિત્તેનૈવા ચ પૂર્યતે, અપ ચ ક્ષીયતે । તદેતન્નભ્યં યદયમાત્મા, પ્રધિર્વિત્તમ્ । તસ્માદ્યદિ અપિ સર્વજ્યાનિં જીયત, આત્મના ચેજ્ જીવતિ, પ્રધિનાગાદિત્યાહુઃ ।

pM24/k16

અથ ત્રયો વાવ લોકાઃ મનુષ્યલોકઃ, પિતૃલોકો, દેવલોક ઇતિ । સોઽયં મનુષ્યલોકઃ પુત્રેણૈવ જય્યો, નાન્યેન કર્મણા; કર્મણા પિતૃલોકો; વિદ્યયા દેવલોકો । દેવલોકો વૈ લોકાનાꣳ શ્રેષ્ઠસ્; તસ્માદ્વિદ્યાં પ્રશꣳસન્તિ ।

pM25/k17

અથાતઃ સમ્પ્રત્તિઃ । યદા પ્રૈષ્યન્મન્યતે, અથ પુત્રમાહઃ ત્વં બ્રહ્મ, ત્વં યજ્ઞઃ ત્વં લોક ઇતિ । સ પુત્રઃ પ્રત્યાહાહં બ્રહ્માહં યજ્ઞો, અહમ્લોક ઇતિ ।

pM26/k17

યદ્વૈ કિઙ્ચાનૂક્તં, તસ્ય સર્વસ્ય બ્રહ્મેત્યેકતા । યે વૈ કેચ યજ્ઞાઃ તેષાꣳ સર્વેષાં યજ્ઞ ઇત્યેકતા । યે વૈ કેચ લોકાઃ તેષાꣳ સર્વેષાં લોક ઇત્યેકતૈતાવદ્વા ઇદꣳ સર્વમ્ એતન્મા સર્વꣳ સન્નયમિતો ભુનજદિતિ । તસ્માત્પુત્રમનુશિષ્ટં લોક્યમાહુઃ તસ્માદેનમનુશાસતિ । સ યદૈવંવિદસ્માલ્ લોકાત્પ્રૈતિ અથૈભિરેવ પ્રાણૈઃ સહ પુત્રમાવિશતિ । સ યદ્યનેન કિઙ્ચિદક્ષ્ણયા કૃતં ભવતિ, તસ્માદેનꣳ સર્વસ્માત્પુત્રો મુઙ્ચતિ । તસ્માત્પુત્રો નામ । સ પુત્રેણૈવાસ્મિલ્

લોકે પ્રતિતિષ્ઠતિ અથૈનમેતે દેવાઃ પ્રાણા અમૃતા આવિશન્તિ ।

pM27/k18

પૃથિવ્યૈ ચૈનમગ્નેશ્ચ દૈવી વાગાવિશતિ । સા વૈ દૈવી વાગ્યયા,
યદ્-યદેવ વદતિ, તત્-તદ્ભવતિ ।

pM28/k19

દિવશ્ચૈનમાદિત્યાચ્ચ દૈવં મન આવિશતિ । તદ્વૈ
દૈવં મનો યેનાનન્દ્યેવ ભવતિ અથો ન શોચતિ ।

pM29/k20

અદ્ભ્યશ્ચૈનં ચન્દ્રમસશ્ચ દૈવઃ પ્રાણ આવિશતિ । સ વૈ દૈવઃ પ્રાણો
યઃ સઞ્ચરઁશ્ચાસઞ્ચરઁશ્ચ ન વ્યથતે, અથો ન રિષ્યતિ । સ
એષ એવંવિત્સર્વેષાં ભૂતાનામાત્મા ભવતિ । યથૈષા દેવતૈવઁ સ ।
યથૈતાં દેવતાઁ સર્વાણિ ભૂતાન્યવન્તિ એવઁ હૈવંવિદઁ સર્વાણિ
ભૂતાન્યવન્તિ । યદુ કિઞ્ચેમાઃ પ્રજાઃ શોચન્તિ અમૈવાસાં તદ્ભવતિ,
પુણ્યમેવામું ગચ્છતિ, ન હ વૈ દેવાન્પાપં ગચ્છતિ ।

pM30/k21

અથાતો વ્રતમીમાઁસા । પ્રજાપતિર્હ કર્માણિ સસૃજે । તાનિ
સૃષ્ટાન્યન્યોઽન્યેનાસ્પર્ધન્તઃ વદિષ્યામ્યેવાહમિતિ વાગ્દધ્રે;
દ્રક્ષ્યામ્યહમિતિ ચક્ષુઃ; શ્રોષ્યામ્યહમિતિ શ્રોત્રમ્; એવમન્યાનિ કર્માણિ
યથાકર્મમ્ ।

pM31/k21

તાનિ મૃત્યુઃ શ્રમો ભૂત્વોપયેમે, તાન્યાપ્નોત્; તાન્યાપ્ત્વા મૃત્યુરવારુન્દ્ધ ।
તસ્માચ્છ્રામ્યત્યેવ વાક્ શ્રામ્યતિ ચક્ષુઃ, શ્રામ્યતિ શ્રોત્રમ્ । અથેમમેવ
નાપ્નોદ્ યોઽયં મધ્યમઃ પ્રાણઃ ।

pM32/k21

તાનિ જ્ઞાતું દધ્રિરેઽયં વૈ નઃ શ્રેષ્ઠો યઃ સઞ્ચરંશ્ચાસઞ્ચરંશ્ચ
ન વ્યથતે, અથો ન રિષ્યતિ । હન્તાસ્યૈવ સર્વે રૂપં ભવામેતિ ।
ત એતસ્યૈવ સર્વે રૂપમભવન્ । તસ્માદેત એતેનાખ્યાયન્તે પ્રાણા ઇતિ ।
તેન હ વાવ તત્કુલમાચક્ષતે, યસ્મિન્કુલે ભવતિ ય એવં વેદ । ય
ઉ હૈવંવિદા સ્પર્ધતે
Kadd અનુશુષ્યતિ

અનુશુષ્ય હૈવાન્તતો મ્રિયત । ઇત્યધ્યાત્મમ્ ।

pM33/k22

અથાધિદેવતમ્ જ્વલિષ્યામ્યેવાહમિત્યગ્નિર્દધ્રે; તપ્સ્યામ્યહમિત્યાદિત્યો; ભાસ્યામ્યહમિતિ ચન્દ્રમા; એવમન્યા દેવતા યથાદેવતઁ । સ યથૈષાં પ્રાણાનાં મધ્યમઃ પ્રાણ, એવમેતાસાં દેવતાનાં વાયુઃ । મ્લોચન્તિ હ્યન્યા દેવતા, ન વાયુઃ । સૈષાનસ્તમિતા દેવતા યદ્વાયુઃ ।

pM34/k23

અથૈષ શ્લોકો ભવતિઃ યતશ્ચોદેતિ સૂર્યો, અસ્તં યત્ર ચ ગચ્છતીતિ પ્રાણાદ્વા એષ ઉદેતિ, પ્રાણેઽસ્તમેતિ તં દેવાશ્ચક્રિરે ધર્મઁ, સ એવાદ્ય, સ ઉ શ્વ ઇતિ । યદ્વા એતેઽમુર્હ્યધ્રિયન્ત, તદેવાપ્યદ્ય કુર્વન્તિ । તસ્માદેકમેવ વ્રતં ચરેત્ । પ્રાણ્યાચ્ચૈવાપાન્યાચ્ચ નેન્મા પાપ્મા મૃત્યુરાપ્નવદિતિ । યદ્યુ ચરેત્ સમાપિપયિષેત્ । તેનો એતસ્યૈ દેવતાયૈ સાયુજ્યઁ સલોકતાં જયતિ, ય એવં વેદ ।

ch6 = SBM 14.4.4.1-4= SBK16.3.6.1-3

pMK1

ત્રયં વા ઇદં, નામ રૂપં કર્મ । તેષાં નામ્નાં વાગિત્યેતદેષામુક્થમ્ અતો હિ સર્વાણિ નામાન્યુત્તિષ્ઠન્તિ । એતદેષાઁ સામૈતદ્ધિ સર્વૈર્નામભિઃ સમમ્ । એતદેષાં બ્રહ્મૈતદ્ધિ સર્વાણિ નામાનિ બિભર્તિ ।

pMK2

અથ રૂપાણાં ચક્ષુરિત્યેતદેષામુક્થમ્ અતો હિ સર્વાણિ રૂપાણ્યુત્તિષ્ઠન્તિ । એતદેષાઁ સામૈતદ્ધિ સર્વૈ રૂપૈઃ સમમ્ । એતદેષાં બ્રહ્મૈતદ્ધિ સર્વાણિ રૂપાણિ બિભર્તિ ।

pMK3

અથ કર્મણામાત્મેત્યેતદેષામુક્થમ્ અતો હિ સર્વાણિ કર્માણ્યુત્તિષ્ઠન્તિ । એતદેષાઁ સામૈતદ્ધિ સર્વૈઃ કર્મભિઃ સમમ્ । એતદેષાં બ્રહ્મૈતદ્ધિ સર્વાણિ કર્માણિ બિભર્તિ । તદેતત્ત્રયઁ સદેકમયમાત્માત્મો એકઃ સન્નેતત્ત્રયમ્ । તદેતદમૃતઁ સત્યેન છન્નમ્ । પ્રાણો વા અમૃતં, નામરૂપે સત્યં; તાભ્યામયં પ્રાણશ્છન્નઃ ।

ch2 = SBM 14.5.1-9= SBK16.4.1-9

ch1

pMK1

દૃપ્તબાલાકિર્હાનૂચાનો ગાર્ગ્ય આસ । સ હોવાચાજાતશત્રું
કાશ્યમ્ બ્રહ્મ તે બ્રવાણીતિ । સ હોવાચાજાતશત્રુઃ સહસ્રમેતસ્યાં વાચિ
દદ્મોઃ જનકો, જનક ઇતિ વૈ જના ધાવન્તીતિ ।

pMK2

સ હોવાચ ગાર્ગ્યોઃ ય એવાસાવાદિત્યે પુરુષ, એતમેવાહં બ્રહ્મોપાસ ઇતિ ।
સ હોવાચાજાતશત્રુઃ મા મૈતસ્મિન્ત્સંવદિષ્ઠા । અતિષ્ઠાઃ સર્વેષાં ભૂતાનાં
મૂર્ધા રાજેતિ વા
અહમેતમુપાસ ઇતિ ।
સ ય એતમેવમુપાસ્તે, અતિષ્ઠાઃ સર્વેષાં ભૂતાનાં મૂર્ધા રાજા ભવતિ ।

pMK3

સ હોવાચ ગાર્ગ્યોઃ ય એવાસૌ ચન્દ્રે પુરુષ, એતમેવાહં બ્રહ્મોપાસ
ઇતિ । સ હોવાચાજાતશત્રુઃ મા મૈતસ્મિન્ત્સંવદિષ્ઠા । બૃહન્પાણ્ડરવાસાઃ
સોમો રાજેતિ વા અહમેતમુપાસ ઇતિ । સ ય એતમેવમુપાસ્તે, અહર્-અહર્
સુતઃ પ્રસુતો ભવતિ, નાસ્યાન્નં ક્ષીયતે ।

pMK4

સ હોવાચ ગાર્ગ્યોઃ ય એવાયં વિદ્યુતિ પુરુષ, એતમેવાહં બ્રહ્મોપાસ ઇતિ ।
સ હોવાચાજાતશત્રુઃ મા મૈતસ્મિન્ત્સંવદિષ્ઠાઃ । તેજસ્વીતિ વા અહમેતમુપાસ
ઇતિ । સ ય એતમેવમુપાસ્તે, તેજસ્વી હ ભવતિ, તેજસ્વિની હાસ્ય પ્રજા ભવતિ ।

pMK5

સ હોવાચ ગાર્ગ્યોઃ ય એવાયમાકાશે પુરુષ, એતમેવાહં બ્રહ્મોપાસ ઇતિ ।
સ હોવાચાજાતશત્રુઃ મા મૈતસ્મિન્ત્સંવદિષ્ઠાઃ । પૂર્ણમપ્રવર્તીતિ વા
અહમેતમુપાસ ઇતિ । સ ય એતમેવમુપાસ્તે, પૂર્યતે પ્રજયા પશુભિઃ
નાસ્યાસ્માલ્ લોકાત્પ્રજોદ્વર્તતે ।

pMK6

સ હોવાચ ગાર્ગ્યોઃ ય એવાયં વાયૌ પુરુષ, એતમેવાહં બ્રહ્મોપાસ ઇતિ ।
સ હોવાચાજાતશત્રુઃ મા મૈતસ્મિન્ત્સંવદિષ્ઠા । ઇન્દ્રો વૈકુણ્ઠોઽપરાજિતા
સેનેતિ વા અહમેતમુપાસ ઇતિ । સ ય એતમેવમુપાસ્તે,

જિષ્ણુર્હાપરાજિષ્ણુર્ભવત્યન્યતસ્ત્યજાયી ।

pMK7

સ હોવાચ ગાર્ગ્યઃ ય એવાયમગ્નૌ પુરુષ, એતમેવાહં બ્રહ્મોપાસ
ઇતિ । સ હોવાચાજાતશત્રુઃ મા મૈતસ્મિન્ત્સંવદિષ્ઠા । વિષાસહિરિતિ
વા અહમેતમુપાસ ઇતિ । સ ય એતમેવમુપાસ્તે, વિષાસહિર્હ ભવતિ,
વિષાસહિર્હાસ્ય પ્રજા ભવતિ ।

pMK8

સ હોવાચ ગાર્ગ્યઃ ય એવાયમપ્સુ પુરુષ, એતમેવાહં બ્રહ્મોપાસ
ઇતિ । સ હોવાચાજાતશત્રુઃ મા મૈતસ્મિન્ત્સંવદિષ્ઠાઃ । પ્રતિરૂપ ઇતિ
વા અહમેતમુપાસ ઇતિ । સ ય એતમેવમુપાસ્તે, પ્રતિરૂપꣳ
હૈવૈનમુપગચ્છતિ, નાપ્રતિરૂપમ્ અથો પ્રતિરુપોऽસ્માજ્ જાયતે ।

pMK9

સ હોવાચ ગાર્ગ્યઃ ય એવાયમાદર્શે પુરુષ, એતમેવાહં બ્રહ્મોપાસ
ઇતિ । સ હોવાચાજાતશત્રુઃ મા મૈતસ્મિન્ત્સંવદિષ્ઠા । રોચિષ્ણુરિતિ
વા અહમેતમુપાસ ઇતિ । સ ય એતમેવમુપાસ્તે, રોચિષ્ણુર્હ ભવતિ,
રોચિષ્ણુર્હાસ્ય પ્રજા ભવતિ અથો યૈઃ સન્નિગચ્છતિ, સર્વાꣳ સ્તાનતિરોચતે ।

pM10/k11

સ હોવાચ ગાર્ગ્યઃ ય એવાયં દિક્ષુ પુરુષ, એતમેવાહં બ્રહ્મોપાસ
ઇતિ । સ હોવાચાજાતશત્રુઃ મા મૈતસ્મિન્ત્સંવદિષ્ઠા । દ્વિતીયોऽનપગ ઇતિ
વા અહમેતમુપાસ ઇતિ । સ ય એતમેવમુપાસ્તે, દ્વિતીયવાન્હ ભવતિ,
નાસ્માદ્ગણશ્છિદ્યતે ।

pM11/k10

સ હોવાચ ગાર્ગ્યઃ ય એવાયં યન્તં પશ્ચાચ્છબ્દોऽનૂદેતિ એતમેવાહં
બ્રહ્મોપાસ ઇતિ । સ હોવાચાજાતશત્રુઃ મા મૈતસ્મિન્ત્સંવદિષ્ઠા । અસુરિતિ
વા અહમેતમુપાસ ઇતિ । સ ય એતમેવમુપાસ્તે, સર્વꣳ હૈવાસ્મિꣳલ્
લોક આયુરેતિ, નૈનં પુરા કાલાત્પ્રાણો જહાતિ ।

pMK12

સ હોવાચ ગાર્ગ્યઃ ય એવાયં છાયામયઃ પુરુષ, એતમેવાહં બ્રહ્મોપાસ
ઇતિ । સ હોવાચાજાતશત્રુઃ મા મૈતસ્મિન્ત્સંવદિષ્ઠા । મૃત્યુરિતિ વા
અહમેતમુપાસ ઇતિ । સ ય એતમેવમુપાસ્તે, સર્વꣳ હૈવાસ્મિꣳલ્

લોક આયુરેતિ, નૈનં પુરા કાલાન્મૃત્યુરાગચ્છતિ ।

pMK13

સ હોવાચ ગાર્ગ્યો૰ ય એવાયમાત્મનિ પુરુષો, એતમેવાહં બ્રહ્મોપાસ ઇતિ ।
સ હ ઉવાચાજાતશત્રુઃ મા મૈતસ્મિન્સંવદિષ્ઠા । અત્મન્વીતિ વા અહમેતમુપાસ
ઇતિ । સ ય એતમેવમુપાસ્ત, આત્મન્વી હ ભવતિ આત્મન્વિની હાસ્ય પ્રજા ભવતિ ।
સ હ તૂષ્ણીમાસ ગાર્ગ્યઃ ।

pMK14

સ ! હોવાચાજાતશત્રુઃ એતાવન્નુ૩ ઇતિ । એતાવદ્ધીતિ । નૈતાવતા વિદિતં
ભવતીતિ । સ હોવાચ ગાર્ગ્યઃ ઉપ ત્વાયાનીતિ ।

pMK15

સ હોવાચાજાતશત્રુઃ પ્રતિલોમં વૈ તદ્યદ્બ્રાહ્મણઃ ક્ષત્રિયમુપેયાદ્
બ્રહ્મ મે વક્ષ્યતીતિ । વ્યેવ ત્વા જ્ઞપયિષ્યામીતિ । તં પાણાવાદાયોત્તસ્થૌ ।
તૌ હ પુરુષઁ સુપ્તમાજગ્મતુઃ । તમેતૈર્નામભિરામન્ત્રયાં ચક્રે
બૃહન્પાણ્ડરવાસઃ, સોમ રાજન્નિતિ । સ નોત્તસ્થૌ । તં પાણિનાપેષં
બોધયાં ચકાર । સ હોત્તસ્થૌ ।

pMK16

સ હોવાચાજાતશત્રુઃ યત્રૈષ એતત્સુપ્તોઽભૂદ્ ય એષ વિજ્ઞાનમયઃ પુરુષઃ,
ક્વૈષ તદાભૂત્ કુત એતદાગાદિતિ । તદુ હ ન મેને ગાર્ગ્યઃ ।

pMK17

સ હોવાચાજાતશત્રુઃ યત્રૈષ એતત્સુપ્તોઽભૂદ્ ય એષ વિજ્ઞાનમયઃ પુરુષઃ
તદેષાં પ્રાણાનાં વિજ્ઞાનેન વિજ્નાનમાદાય, ય એષોઽન્તર્હૃદય આકાશઃ
તસ્મિઞ્છેતે ।

pM18/k17

તાનિ યદા ગૃહ્ણાતિ અથ હૈતત્પુરુષઃ સ્વપિતિ નામ । તદ્ગૃહીત એવ
પ્રાણો ભવતિ, ગૃહીતા વાગ્ ગૃહીતં ચક્ષુઃ ગૃહીતઁ શ્રોત્રં, ગૃહીતં
મનઃ ।

pM19/k18

સ યત્રૈતત્સ્વપ્ન્યયા ચરતિ, તે હાસ્ય લોકાઃ । તદુતેવ મહારાજો ભવતિ
ઉતેવ મહાબ્રાહ્મણ, ઉતેવોચ્ચાવચં નિગચ્છતિ ।

pM20/k18

સ યથા મહારાજો જાનપદાન્ગૃહીત્વા સ્વે જનપદે યથાકામં
પરિવર્તેતૈવમેવૈષ એતત્પ્રાણાન્ગૃહીત્વા સ્વે શરીરે યથાકામં
પરિવર્તતે ।

pM21/k19

અથ યદા સુષુપ્તો ભવતિ, યદા ન કસ્ય ચન વેદ, હિતા નામ નાડ્યો
દ્વાસપ્તતિઃ સહસ્રાણિ હૃદયાત્પુરીતતમભિપ્રતિષ્ઠન્તે ! । તાભિઃ પ્રત્યવસૃપ્ય
પુરીતતિ શેતે ।

pM22/k19

સ

K ૐ

યથા કુમારો

Kadd વા મહારાજો

વા મહાબ્રાહ્મણો વાતિઘ્નીમાનન્દસ્ય ગત્વા શયીતૈવમેવૈષ એતચ્છેતે ।

pM23/k20

સ યથોર્ણવાભિસ્તન્તુનોચ્ચરેદ્ યથા અગ્નેઃ ક્ષુદ્રા વિષ્ફુલિઙ્ગા
વ્યુચ્ચરન્તિ એવમેવાસ્માદાત્મનઃ સર્વે પ્રાણાઃ સર્વે લોકાઃ સર્વે દેવાઃ
સર્વાણિ ભૂતાનિ સર્વ એત આત્મનો

K ૐ સર્વ ...

વ્યુચ્ચરન્તિ । તસ્યોપનિષત્સત્યસ્ય સત્યમિતિઃ પ્રાણા વૈ સત્યં, તેષામેષ
સત્યમ્ ।

ch2

pMK1

યો હ વૈ શિશુꣳ સાધાનꣳ સપ્રત્યાધાનꣳ
સસ્થૂણꣳ સદામં વેદ, સપ્ત હ દ્વિષતો ભ્રાતૃવ્યાનવરુણદ્ધિ ।

pM2/k1

અયં વાવ શિશુર્યોઽયં મધ્યમઃ પ્રાણસ્; તસ્યેદમેવાધાનમ્ ઇદં
પ્રત્યાધાનં, પ્રાણઃ સ્થૂણાન્નં દામ ।

pM2/k2

તમેતાઃ સમાક્ષિતય ઉપતિષ્ઠન્તેઃ

pM3/k2

તદ્યા ઇમા અક્ષઁલ્ લોહિન્યો રાજયઃ તાભિરેનઁ રુદ્રોઽન્વાયત્તો;
અથ યા અક્ષન્નાપઃ તાભિઃ પર્જન્યો; યા કનીનકા, તયાદિત્યો; યચ્છુક્લં
K કૃષ્ણં

તેનાગ્નિઃ યચ્કૃષ્ણં
K શુક્લં

તેનેન્દ્રો । અધરયૈનં વર્તન્યા પૃથિવ્યન્વાયત્તા, દ્યૌરુત્તરયા । નાસ્યાન્નં
ક્ષીયતે, ય એવં વેદ ।

pM4/k3

તદેષ શ્લોકો ભવતિ અર્વાગ્બિલશ્ચમસ ઊર્ધ્વબુધ્નસ્; તસ્મિન્યશો નિહિતં
વિશ્વરૂપમ્ । તસ્યાસત ઋષયઃ સપ્ત તીરે; વાગષ્ટમી બ્રહ્મણા સંવિદાનેતિ ।

pM5/k3

અર્વાગ્બિલશ્ચમસ ઊર્ધ્વબુધ્ન ઇતીદં તચ્છરીર, એષ હ્યર્વાગ્બિલશ્ચમસ
ઊર્ધ્વબુધ્નઃ । તસ્મિન્યશો નિહિતં વિશ્વરૂપમિતિ, પ્રાણા વૈ યશો નિહિતં
વિશ્વરૂપં, પ્રાણાનેતદાહ । તસ્યાસત ઋષયઃ સપ્ત તીર ઇતિ, પ્રાણા વા
ઋષયઃ, પ્રાણાણેતદાહ । વાગષ્ટમી બ્રહ્મણા સંવિદાનેતિ, વાગ્ઘ્યષ્ટમી
બ્રહ્મણા સંવિત્તે ।

pM6/k4

ઇમાવેવ ગોતમભરદ્વાજાઉ અયમેવ ગોતમો, અયં ભરદ્વાજ । ઇમાવેવ
વિશ્વામિત્રજમદગ્નીરયમેવ વિશ્વામિત્રો, અયં જમદગ્નિઃ । ઇમાવેવ
વસિષ્ઠકશ્યપાઉ અયમેવ વસિષ્ઠો, અયં કશ્યપો । વાગેવાત્રિઃ વાચા
હ્યન્નમદ્યતે, અત્તિર્હ વૈ નામૈતદ્યદત્રિરિતિ । સર્વસ્યાત્તા ભવતિ,
સર્વમસ્યાન્નં ભવતિ, ય એવં વેદ ।

ch3

pMK1

દ્વે વાવ બ્રહ્મણો રૂપેઃ મૂર્તં ચૈવામૂર્તં ચ, મર્ત્યં
ચામૃતં ચ, સ્થિતં ચ યચ્ચ, સચ્ચ ત્યં ચ ।

pMK2

તદેતન્મૂર્તં યદન્યદ્વાયોશ્ચાન્તરિક્ષાચ્ચૈતન્મર્ત્યમ્ એતત્સ્થિતમ્
એતત્સત્ ।

pM3/k2
તસ્યૈતસ્ય મૂર્તસ્યૈતસ્ય મર્ત્યસ્યૈતસ્ય સ્થિતસ્યૈતસ્ય સત એષ રસો
ય એષ તપતિ; સતો હ્યેષ રસઃ ।

pM4/k3
અથામૂર્તં વાયુશ્ચાન્તરિક્ષશ્ચૈતદમૃતમ્ એતદ્યદેતત્ત્યમ્ ।

pM5/k3
તસ્યૈતસ્યામૂર્તસ્ય, તસ્યામૃતસ્યૈતસ્ય યત, એતસ્ય ત્યસ્યૈષ રસો ય
એષ એતસ્મિન્મણ્ડલે પુરુષસ્; ત્યસ્ય હ્યેષ રસ । ઇત્યધિદેવતમ્ ।

pM6/k4
અથાધ્યાત્મમ્ । ઇદમેવ મૂર્તં યદન્યત્પ્રાણાચ્ચ
યશ્ચાયમન્તરાત્મન્નાકાશઃ એતન્મર્ત્યમ્ એતત્સ્થિતમ્ એતત્સત્ ।

pM7/k4
તસ્યૈતસ્ય મૂર્તસ્ય, એતસ્ય મર્ત્યસ્યૈતસ્ય સ્થિતસ્યૈતસ્ય સત એષ
રસો યચ્ચક્ષુ઼ઃ; સત હ્યેષ રસઃ ।

pM8/k5
અથામૂર્તમ્ પ્રાણશ્ચ યશ્ચાયમન્તરાત્મન્નાકાશ, એતદમૃતમ્ એતદ્યદ્
એતત્ત્યમ્ ।

pM9/k5
તસ્યૈતસ્યામૂર્તસ્યૈતસ્યામૃતસ્યૈતસ્ય યત, એતસ્ય ત્યસ્યૈષ રસો
યોઽયં દક્ષિણેઽક્ષન્પુરુષસ્; ત્યસ્ય હ્યેષ રસઃ ।

pM10/k6
તસ્ય હૈતસ્ય પુરુષસ્ય રૂપં યથા માહારજનં વાસો, યથા પાણ્ડ્વાવિકં,
યથેન્દ્રગોપો, યથાગ્ન્યર્ચિઃ યથા પુણ્ડરીકં, યથા સકૃદ્વિદ્યુત્તઁ ।
સકૃદ્વિદ્યુત્તેવ હ વા અસ્ય શ્રીર્ભવતિ, ય એવં વેદ ।

pM11/k6
અથાત આદેશઃ નેતિ નેતિ, ન હ્યેતસ્માદિતિ નેત્યન્યત્પરમસ્તિ । અથ
નામધેયઁ સત્યસ્ય સત્યમિતિઃ પ્રાણા વૈ સત્યં, તેષામેષ સત્યમ્ ।

ch4

pMK1

મૈત્રેયીતિ હોવાચ યાજ્ઞવલ્ક્ય, ઉદ્યાસ્યન્વા
અરેઽહમસ્માત્સ્થાનાદસ્મિ । હન્ત તેઽનયા કાત્યાયન્યાન્તં કરવાણીતિ ।

pMK2

સા હોવાચ મૈત્રેયીઃ યન્મ ઇયં, ભગોઃ, સર્વા પૃથિવી વિત્તેન પૂર્ણા સ્યાત્
કથં તેનામૃતા સ્યામિતિ । નેતિ હોવાચ યાજ્ઞવલ્ક્યો; યથૈવોપકરણવતાં
જીવિતં, તથૈવ તે જીવિતઁ સ્યાદ્; અમૃતત્વસ્ય તુ નાશાસ્તિ વિત્તેનેતિ ।

pMK3

સા હોવાચ મૈત્રેયીઃ યેનાહં નામૃતા સ્યાં, કિમહં તેન કુર્યામ્ । યદેવ
ભગવાન્વેદ, તદેવ મે બ્રૂહીતિ ।

pMK4

સ હોવાચ યાજ્ઞવલ્ક્યઃ પ્રિયા વતારે
K બતારે

નઃ સતી પ્રિયં ભાષસ । એહિ આસ્વ
K આસ્સ્વ

વ્યાખ્યાસ્યામિ તે । વ્યાચક્ષાણસ્ય તુ મે નિદિધ્યાસસ્વેતિ । બ્રવિતુ ભગવાનિતિ
K ૐ બ્રવિતુ ...

pMK5

સ હોવાચ યાજ્ઞવલ્ક્યો
K ૐ

ન વા અરે પત્યુઃ કામાય પતિઃ પ્રિયો ભવતિ આત્મનસ્તુ કામાય પતિઃ પ્રિયો
ભવતિ । ન વા અરે જાયાયૈ કામાય જાયા પ્રિયા ભવતિ આત્મનસ્તુ કામાય જાયા
પ્રિયા ભવતિ । ન વા અરે પુત્રાણાં કામાય પુત્રાઃ પ્રિયા ભવન્તિ આત્મનસ્તુ
કામાય પુત્રાઃ પ્રિયા ભવન્તિ । ન વા અરે વિત્તસ્ય કામાય વિત્તં પ્રિયં ભવતિ
આત્મનસ્તુ કામાય વિત્તં પ્રિયં ભવતિ । ન વા અરે બ્રહ્મણઃ કામાય બ્રહ્મ
પ્રિયં ભવતિ આત્મનસ્તુ કામાય બ્રહ્મ પ્રિયં ભવતિ । ન વા અરે ક્ષત્રસ્ય
કામાય ક્ષત્રં પ્રિયં ભવતિ આત્મનસ્તુ કામાય ક્ષત્રં પ્રિયં ભવતિ ।
ન વા અરે લોકાનાં કામાય લોકાઃ પ્રિયા ભવન્તિ આત્મનસ્તુ કામાય લોકાઃ

પ્રિયા ભવન્તિ । ન વા અરે દેવાનાં કામાય દેવાઃ પ્રિયા ભવન્તિ આત્મનસ્તુ
કામાય દેવાઃ પ્રિયા ભવન્તિ । ન વા અરે ભૂતાનાં કામાય ભૂતાનિ પ્રિયાણિ
ભવન્તિ આત્મનસ્તુ કામાય ભૂતાનિ પ્રિયાણિ ભવન્તિ । ન વા અરે સર્વસ્ય
કામાય સર્વં પ્રિયં ભવતિ આત્મનસ્તુ કામાય સર્વં પ્રિયં ભવતિ । આત્મા
વા અરે દ્રષ્ટવ્યઃ શ્રોતવ્યો મન્તવ્યો નિદિધ્યાસિતવ્યો । મૈત્રેયિ આત્મનો વા
અરે દર્શનેન શ્રવણેન મત્યા વિજ્ઞાનેનેદꣳ સર્વં વિદિતમ્ ।

pMK6

બ્રહ્મ તં પરાદાદ્યોઽન્યત્રાત્મનો બ્રહ્મ વેદ; ક્ષત્રં તં
પરાદાદ્યોઽન્યત્રાત્મનઃ ક્ષત્રં વેદ; લોકાસ્તં પરાદુર્યોઽન્યત્રાત્મનો
લોકાન્વેદ; દેવાસ્તં પરાદુર્યોઽન્યત્રાત્મનો દેવાન્વેદ; ભૂતાનિ તં
પરાદુર્યોઽન્યત્રાત્મનો ભૂતાનિ વેદ; સર્વં તં પરાદાદ્યોઽન્યત્રાત્મનઃ
સર્વં વેદેદં બ્રહ્મેદં ક્ષત્રમ્ ઇમે લોકા, ઇમે દેવા, ઇમાનિ
ભૂતાનીદꣳ સર્વં, યદયમાત્મા ।

pMK7

સ યથા દુન્દુભેર્હન્યમાનસ્ય ન બાહ્યાઞ્છબ્દાઞ્છક્નુયાદ્ગ્રહણાય, દુન્દુભેસ્
તુ ગ્રહણેન દુન્દુભ્યાઘાતસ્ય વા શબ્દો ગૃહીતઃ;

pM8/k9

યથા વીણાયૈ વાદ્યમાનાયૈ ન બાહ્યાઞ્છબ્દાઞ્છક્નુયાદ્ગ્રહણાય, વીણાયૈ તુ
ગ્રહણેન વીણાવાદસ્ય વા શબ્દો ગ્રહીતઃ;

pM9/k8

સ યથા શઙ્ખસ્ય ધ્માયમાનસ્ય ન બાહ્યાઞ્છબ્દાઞ્છક્નુયાદ્ગ્રહણાય,
શઙ્ખસ્ય તુ ગ્રહણેન શઙ્ખધ્મસ્ય વા શબ્દો ગૃહીતઃ;

pMK10

સ યથાર્દ્રૈધાગ્નેરભ્યાહિતસ્ય
K અભ્યાહિતાત્

પૃથગ્ધૂમા વિનિશ્ચરન્તિ એવ વા અરેઽસ્ય મહતો ભૂતસ્ય નિશ્વસિતમ્
K નિઃશ્વસિતમ્

એતદ્યદૃગ્વેદો યજુર્વેદઃ સામવેદોઽથર્વાઙ્ગિરસ ઇતિહાસઃ પુરાણં વિદ્યા
ઉપનિષદઃ શ્લોકાઃ સૂત્રાણ્યનુવ્યાખ્યાનાનિ વ્યાખ્યાનનિ અસ્યૈવૈતાનિ સર્વાણિ
નિશ્વસિતાનિ

K નિઃશ્વસિતાનિ

pMK11

સ યથા સર્વાસામપાꣳ સમુદ્ર એકાયનમ્ એવꣳ સર્વેષાꣳ સ્પર્શાનાં
ત્વગેકાયનમ્ એવꣳ સર્વેષાં ગન્ધાનાં નાસિકે એકાયનમ્ એવꣳ સર્વેષાꣳ
રસાનાં જિહ્વૈકાયનમ્ એવꣳ સર્વેષાꣳ રૂપાણાં ચક્ષુરેકાયનમ્ એવꣳ
સર્વેષꣳ શબ્દાનાꣳ શ્રોત્રમેકાયનમ્
એવꣳ સર્વેષાꣳ સઙ્કલ્પાનાં મન એકાયનમ્

K વરિઅતો ઓર્દિનેઃ

એવꣳ સર્વેષાં વેદાનાં વાગેકાયનમ્
એવꣳ સર્વેષાં કર્મણાꣳ હસ્તાવેકાયનમ્
એવꣳ સર્વેષામધ્વનાં પાદાવેકાયનમ્
એવꣳ સર્વેષામાનન્દાનામુપસ્થ એકાયનમ્
એવꣳ સર્વેષાં વિસર્ગાણાં પાયુરેકાયનમ્
એવꣳ સર્વાસાં વિદ્યાનાꣳ હૃદયમેકાયનમ્

pMK12

સ યથા સૈન્ધવખિલ્ય ઉદકે પ્રાસ્ત ઉદકમેવાનુવિલીયેત,
નાહાસ્યોદ્ગ્રહણાયૈવ

K ન હાસ્યોદ્ગ્રહણાયૈવ

સ્યાદ્ યતો-યતસ્ત્વાદદીત લવણમેવૈવં વા અર ઇદં
મહદ્ભૂતમનન્તમપારં વિજ્ઞાનઘન એવૈતેભ્યો ભૂતેભ્યઃ સમુત્થાય,
તાન્યેવાનુવિનશ્યતિ; ન પ્રેત્ય સઞ્જ્ઞાસ્તીત્યરે બ્રવીમીતિ હોવાચ યાજ્ઞવલ્ક્યઃ ।

pMK13

સા હોવાચ મૈત્રેયિ અત્રૈવ મા ભગવાનમૂમુહદ્ ન પ્રેત્ય સઞ્જ્ઞાસ્તીતિ ।

pM14/k13

સ હોવાચ યાજ્ઞવલ્ક્યો

K ૐ

ન વા અરેઽહં મોહં બ્રવીમિ અલં વા અર ઇદં વિજ્ઞાનાય ।

pM15/k14

યત્ર હિ દ્વૈતમિવ ભવતિ,

K વરિઅતો ઓર્દિનેઃ

તદિતર ઇતરં જિઘ્રતિ, તદિતર ઇતરં પશ્યતિ તદિતર ઇતરꣳ શ઼ૃણોતિ,
તદિતર ઇતરમભિવદતિ, તદિતર ઇતરં મનુતે, તદિતર ઇતરં વિજાનાતિ ।

pM16/k14

યત્ર ત્વસ્ય સર્વમાત્મૈવાભૂત્

K variato ordineH

તત્કેન કં પશ્યેત્
તત્કેન કં જિઘ્રેત્
તત્કેન કꣳ શ઼ૃણુયાત્
તત્કેન કમભિવદેત્
તત્કેન કં મન્વીત,
તત્કેન કં વિજાનીયાદ્ ।
યેનેદꣳ સર્વં વિજાનાતિ,
તં કેન વિજાનીયાદ્
વિજ્ઞાતારમરે કેન વિજાનીયાદિતિ ।

ch5

pMK1

ઇયં પૃથિવી સર્વેષાં ભૂતાનાં મધુ અસ્યૈ પૃથિવ્યૈ
સર્વાણિ ભૂતાનિ મધુ; યશ્ચાયમસ્યાં પૃથિવ્યાં તેજોમયોઽમૃતમયઃ
પુરુષો, યસ્યાયમધ્યાત્મꣳ શારીરસ્તેજોમયોઽમૃતમયઃ પુરુષો,
અયમેવ સ યોઽયમાત્મેદમમૃતમ્ ઇદં બ્રહ્મ, ઇદꣳ સર્વમ્ ।

pMK2

ઇમા આપઃ સર્વેષાં ભૂતાનાં મધુ આસામપાꣳ સર્વાણિ ભૂતાનિ મધુ;
યશ્ચાયમાસ્વપ્સુ તેજોમયોઽમૃતમયઃ પુરુષો, યશ્ચાયમધ્યાત્મꣳ
રૈતસસ્તેજોમયોઽમૃતમયઃ પુરુષો, અયમેવ સ યોઽયમાત્મેદમમૃતમ્
ઇદં બ્રહ્મ, ઇદꣳ સર્વમ્ ।

pMK3

અયમગ્નિઃ સર્વેષાં ભૂતાનાં મધુ અસ્યાગ્નેઃ સર્વાણિ ભૂતાનિ મધુ;
યશ્ચાયમસ્મિન્નગ્નૌ તેજોમયોઽમૃતમયઃ પુરુષો, યશ્ચાયમધ્યાત્મં
વાઙ્મયસ્તેજોમયોઽમૃતમયઃ પુરુષો, અયમેવ સ યોઽયમાત્મેદમમૃતમ્

ઇદં બ્રહ્મ, ઇદꣳ સર્વમ્ ।

pM4/k10

અયમાકાશઃ સર્વેષાં ભૂતાનાં મધુ અસ્યાકાશસ્ય સર્વાણિ ભૂતાનિ
મધુ; યશ્ચાયમસ્મિન્નાકાશે તેજોમયોઽમૃતમયઃ પુરુષો,
યશ્ચાયમધ્યાત્મꣳ હૃદ્યાકાશસ્તેજોમયોઽમૃતમયઃ પુરુષો, અયમેવ
સ યોઽયમાત્મેદમમૃતમ્ ઇદં બ્રહ્મેદꣳ સર્વમ્ ।

pM5/k4

અયં વાયુઃ સર્વેષાં ભૂતાનાં મધુ અસ્ય વાયોઃ સર્વાણિ ભૂતાનિ મધુ;
યશ્ચાયમસ્મિન્વાયૌ તેજોમયોઽમૃતમયઃ પુરુષો, યશ્ચાયમધ્યાત્મં
પ્રાણસ્તેજોમયોઽમૃતમયઃ પુરુષો, અયમેવ સ યોઽયમાત્મેદં અમૃતમ્
ઇદં બ્રહ્મેદꣳ સર્વમ્ ।

pM6/k5

અયમાદિત્યઃ સર્વેષાં ભૂતાનાં મધુ અસ્યાદિત્યસ્ય સર્વાણિ ભૂતાનિ મધુ;
યશ્ચાયમસ્મિન્નાદિત્યે તેજોમયોઽમૃતમયઃ પુરુષો, યશ્ચાયમધ્યાત્મં
ચાક્ષુષસ્તેજોમયોઽમૃતમયઃ પુરુષો, અયમેવ સ યોઽયમાત્મેદમમૃતમ્
ઇદં બ્રહ્મેદꣳ સર્વમ્ ।

pMK7

અયં ચન્દ્રઃ સર્વેષાં ભૂતાનાં મધુ અસ્ય ચન્દ્રસ્ય સર્વાણિ ભૂતાનિ મધુ;
યશ્ચાયમસ્મિન્ચન્દ્રે તેજોમયોઽમૃતમયઃ પુરુષો, યશ્ચાયમધ્યાત્મં
માનસસ્તેજોમયોઽમૃતમયઃ પુરુષો, અયમેવ સ યોઽયમાત્મેદમમૃતમ્
ઇદં બ્રહ્મેદꣳ સર્વમ્ ।

pM8/k6

ઇમા દિશઃ સર્વેષાં ભૂતાનાં મધુ આસાં દિશાꣳ સર્વાણિ ભૂતાનિ મધુ;
યશ્ચાયમાસુ દિક્ષુ તેજોમયોઽમૃતમયઃ પુરુષો, યશ્ચાયમધ્યાત્મꣳ
શ્રૌત્રઃ પ્રાતિશ્રુત્કસ્તેજોમયોઽમૃતમયઃ પુરુષો, અયમેવ સ
યોઽયમાત્મેદમમૃતમ્ ઇદં બ્રહ્મેદꣳ સર્વમ્ ।

pM9/k8

ઇયં વિદ્યુત્સર્વેષાં ભૂતાનં મધુ અસ્યૈ વિદ્યુતઃ સર્વાણિ ભૂતાનિ મધુ;
યશ્ચાયમસ્યાં વિદ્યુતિ તેજોમયોઽમૃતમયઃ પુરુષો, યશ્ચાયમધ્યાત્મં
તૈજસસ્તેજોમયોઽમૃતમયઃ પુરુષો, અયમેવ સ યોઽયમાત્મેદમમૃતમ્

ઇદં બ્રહ્મેદꣳ સર્વમ્ ।

pM10/k9

અયꣳ સ્તનયિત્નુઃ સર્વેષાં ભુતાનાં મધુ અસ્ય સ્તનયિત્નોઃ સર્વાણિ ભૂતાનિ મધુ; યશ્ચાયમસ્મિન્સ્તનયિત્નૌ તેજોમયોઽમૃતમયઃ પુરુષો, યશ્ચાયમધ્યાત્મꣳ શાબ્દઃ સૌવરસ્તેજોમયોઽમૃતમયઃ પુરુષો, અયમેવ સ યોઽયમાત્મેદમમૃતમ્ ઇદં બ્રહ્મેદꣳ સર્વમ્ ।

pMK11

અયં ધર્મઃ સર્વેષાં ભૂતાનાં મધુ અસ્ય ધર્મસ્ય સર્વાણિ ભૂતાનિ મધુ; યશ્ચાયમસ્મિન્ધર્મે તેજોમયોઽમૃતમયઃ પુરુષો, યશ્ચાયમધ્યાત્મં ધાર્મસ્તેજોમયોઽમૃતમયઃ પુરુષો, અયમેવ સ યોઽયમાત્મેદમમૃતમ્ ઇદં બ્રહ્મેદꣳ સર્વમ્ ।

pMK12

ઇદꣳ સત્યꣳ સર્વેષાં ભૂતાનાં મધુ અસ્ય સત્યસ્ય સર્વાણિ ભૂતાનિ મધુ; યશ્ચાયમસ્મિન્સત્યે તેજોમયોઽમૃતમયઃ પુરુષો, યશ્ચાયમધ્યાત્મꣳ સાત્યસ્તેજોમયોઽમૃતમયઃ પુરુષો, અયમેવ સ યોઽયમાત્મેદમમૃતમ્ ઇદં બ્રહ્મેદꣳ સર્વમ્ ।

pMK13

ઇદં માનુષꣳ સર્વેષાં ભૂતાનાં મધુ અસ્ય માનુષસ્ય સર્વાણિ ભૂતાનિ મધુ; યશ્ચાયમસ્મિન્માનુષે તેજોમયોઽમૃતમયઃ પુરુષો, યશ્ચાયમધ્યાત્મં માનુષસ્તેજોમયોઽમૃતમયઃ પુરુષો, અયમેવ સ યોઽયમાત્મેદમમૃતમ્ ઇદં બ્રહ્મેદꣳ સર્વમ્ ।

pMK14

અયમાત્મા સર્વેષાં ભૂતાનાં મધુ અસ્યાત્મનઃ સર્વાણિ ભૂતાનિ મધુ; યશ્ચાયમસ્મિન્નાત્મનિ તેજોમયોઽમૃતમયઃ પુરુષો, યશ્ચાયમાત્મા તેજોમયોઽમૃતમયઃ પુરુષો, અયમેવ સ યોઽયમાત્મેદમમૃતમ્ ઇદં બ્રહ્મેદꣳ સર્વમ્ ।

pMK15

સ વા અયમાત્મા સર્વેષાં અધિપતિઃ, સર્વેષાં ભૂતાનાꣳ રાજા । તદ્યથા રથનાભૌ ચ રથનેમૌ ચારાઃ સર્વે સમર્પિતા, એવમેવાસ્મિન્નાત્મનિ સર્વાણિ ભૂતાનિ સર્વે દેવાઃ સર્વે લોકાઃ સર્વે પ્રાણાઃ સર્વ એત આત્માનઃ સમર્પિતાઃ ।

pMK16

ઇદં વૈ તન્મધુ ડધ્યઙ્ઙ્ અથર્વણોઽશ્વિભ્યામુવાચ । તદેતદૃષિઃ
પશ્યન્નવોચત્

lv 1.116.12:

તદ્વાં, નરા, સનયે દઁસ ઉગ્રમ્ આવિષ્કૃણોમિ, તન્યતુર્ન વૃષ્ટિં,
ડધ્યઙ્ હ યન્મધ્વથર્વણો વામ્ અશ્વસ્ય શીર્ષ્ણા પ્ર યદીમુવાચેતિ ।

pMK17

ઇદં વૈ તન્મધુ ડધ્યઙ્ઙ્ અથર્વણોઽશ્વિભ્યામુવાચ । તદેતદૃષિઃ
પશ્યન્નવોચત્

lv 1.117.22:

અથર્વણાયાશ્વિના ડધીચેઽશ્વ્યઁ શિરઃ પ્રત્યૈરયતં; સ વાં મધુ પ્ર
વોચદૃતાયન્ ત્વાષ્ટ્રં યદ્ દસ્રાઉ અપિકક્ષ્યં વામિતિ ।

pMK18

ઇદં વૈ તન્મધુ ડધ્યઙ્ઙ્ અથર્વણોઽશ્વિભ્યામુવાચ । તદેતદૃષિઃ
પશ્યન્નવોચત્ પુરશ્ચક્રે દ્વિપદઃ, પુરશ્ચક્રે ચતુષ્પદઃ; પુરઃ સ,
પક્ષી ભુત્વા, પુરઃ પુરુષ આવિશદિતિ । સ વા અયં પુરુષઃ સર્વાસુ
પૂર્ષુ પુરિશયો; નૈનેન કિં ચનાનાવૃતં, નૈનેન કિં ચનાસંવૃતમ્ ।

pMK19

ઇદં વૈ તન્મધુ ડધ્યઙ્ઙ્ અથર્વણોઽશ્વિભ્યામુવાચ । તદેતદૃષિઃ
પશ્યન્નવોચત્

lv 6.47.18:

રૂપઁ -રૂપં પ્રતિરૂપો બભૂવ, તદસ્ય રૂપં પ્રતિચક્ષણાયે-
-ન્દ્રો માયાભિઃ પુરુરૂપ ઈયતે, યુક્તા હ્યસ્ય હરયઃ શતા દશેતિ ।
અયં વૈ હરયો, અયં વૈ દશ ચ સહસ્રાણિ બહૂનિ ચાનન્તાનિ ચ ।
તદેતદ્બ્રહ્માપૂર્વમનપરમનન્તરમબાહ્યમ્ અયમાત્મા બ્રહ્મ સર્વાનુભૂઃ ।
ઇત્યનુશાસનમ્ । [પનુસ્તુબ્]

pM20

pro m5,20-22 schribitkrishna 6; vide infra

અથ વઁશઃ । તદિદં વયઁ
હૌર્પણાય્યાચ્, છૌર્પણય્યો ગૌતમાદ્ ગૌતમો વત્સ્યાદ્ વત્સ્યો વાત્સ્યાચ્ચ

પારાશર્યાચ્ચ, પારાશર્યઃ ષાઙ્ક્ત્યાચ્ચ ભારદ્વાજાચ્ચ, ભારદ્વાજ
ઔદાવહેશ્ચ હાણ્ડિલ્યાચ્ચ, હાણ્ડિલ્યો વૈજવાપાચ્ચ ગૌતમાચ્ચ, ગૌતમો
વૈજવાપાયનાચ્ચ વૈષ્ટપુરેયાચ્ચ, વૈષ્ટપુરેયઃ હાણ્ડિલ્યાચ્ચ ર૱ૌહિણાયનાચ્ચ,
ર૱ૌહિણાયનઃ હૌનકાચ્ચાત્રેયાચ્ચ ર૱ૈભ્યાચ્ચ, ર૱ૈભ્યઃ પૌતિમાષ્યાયણાચ્ચ
કૌણ્ડિન્યાયનાચ્ચ, કૌણ્ડિન્યાયનઃ કૌણ્ડિન્યાત્ કૌણ્ડિન્યઃ કૌણ્ડિન્યાત્ કૌણ્ડિન્યઃ
કૌણ્ડિન્યાચ્ચાગ્નિવેશ્યાચ્ચ,

pM21

pro m5,20-22 schribitkrishna 6; vide infra

અગ્નિવેશ્યઃ  ષૌતવાત્ ષૌતવઃ પારાશર્યાત્ પારાશર્યઃ જાતુકણ્ર્યાત્ જાતુકણ્ર્યો
ભારદ્વાજાદ્ ભારદ્વાજો ભારદ્વાજાચ્ચાસુરાયણાચ્ચ ગૌતમાચ્ચ, ગૌતમો
ભારદ્વાજાદ્ ભારદ્વાજો વૈજવાપાયનાચ્, વૈજવાપાયનઃ કશિકાયનેઃ,
કશિકાયનિર્ધૃતકૌશિકાદ્ ધૃતકૌશિકઃ  પારાશર્યાત્ પારાશર્યઃ
પારાશર્યાત્ પારાશર્યઃ જાતુકણ્ર્યાત્ જાતુકણ્ર્યો ભારદ્વાજાદ્ ભારદ્વાજો
ભારદ્વાજાચ્ચાસુરાયણાચ્ચસ્કાચ્ચ, અસુરાયણસ્ ટ્રૈવણેઃ ટ્રૈવણિરાઉપજન્ધનેઃ
આઉપજન્ધનિઃઅસુરેરસુરિર્ભારદ્વાજાદ્ ભારદ્વાજો અત્રેયાત્

pM22

pro m5,20-22 schribitkrishna 6; vide infra

અત્રેયો  માણ્ટેઃ, માણ્ટિર્ગૌતમાદ્ ગૌતમો ગૌતમાદ્ ગૌતમો વાત્સ્યાદ્ વાત્સ્યઃ
હાણ્ડિલ્યાચ્, છાણ્ડિલ્યઃ કૈશોર્યાત્કાપ્યાત્ કૈશોર્યઃ કાપ્યઃ કુમારહરિતાત્
કુમારહરિતો  ગાલવાદ્ ગાલવો  વિદર્ભીકૌણ્ડિન્યાદ્ વિદર્ભીકૌણ્ડિન્યો  બાભવાદ્વત્સનપાદ્
બાભવઃ પથઃ  ષૌભરાત્ પન્થાઃ ષૌભરોઽયાસ્યાદઙ્ગિરસાદાયાસ્યો
અઙ્ગિરસઽભુતેસ્ત્વાષ્ટ્રાદભુતિઃ ત્વાષ્ટ્રો વિશ્વરૂપાદ્ત્વાષ્ટ્રાદ્
વિશ્વરૂપસ્ત્વાષ્ટ્રોઽશ્વિભ્યામ્ આશ્વિનૌ ઽધિચ અથર્વનાદ્ ઽધ્યઙ્ઙ્
અથર્વનોઽથર્વનો ડૈવાદથર્વા ડૈવ મૃત્યોઃ  પ્રાધ્ધ્ વઁ સનાન્ મૃત્યુઃ
પ્રાધ્ધ્ વઁ સનઃ ષનગાત્ ષનગઃ પરેષ્ટિણઃ પરેષ્ટી  બ્રહ્મનો બ્રહ્મ
સ્વયમ્ભુ, બ્રહ્મણે નમઃ ।

chk6

schribitkrishna pro m5,20-22; vide supra

pK1

અથ વઁ શઃ પશુતિમાષ્યો ગૌપવનાદ્ ગૌપવનઃ પશુતિમાષ્યાત્ પશુતિમાષ્યો ગૌપવનાદ્

ગૌપવનઃ કૌશિકાત્ કૌશિકઃ કૌણ્ડિન્યાત્ કૌણ્ડિન્યઃ હાણ્ડિલ્યાત્ હાણ્ડિલ્યઃ કૌશિકાચ્ચ
ગૌતમાચ્ચ, ગૌતમો

pK2
અગ્નિવેશ્યાદગ્નિવેશ્યઃ હાણ્ડિલ્યાચ્ચાનભિમ્લાતાચ્ચ, અનભિમ્લાત અનભિમ્લાતાદનભિમ્લાત
અનભિમ્લાતાદનભિમ્લાતો ગૌતમાદ્ ગૌતમઃ ષૈતવપ્રાચીનયોગ્યાભ્યાँ, ષૈતવપ્રાચીનયોગ્યૌ
પારાશર્યાત્ પારાશર્યો ભારદ્વાજાદ્ ભારદ્વાજો ભારદ્વાજાચ્ચ ગૌતમાચ્ચ, ગૌતમો ભારદ્વાજાદ્
ભારદ્વાજઃ પારાશર્યાત્ પારાશર્યો વૈજવાપાયનાદ્ વૈજવાપાયનઃ કૌશિકાયનેઃ, કૌશિકાયનિર્

pK3
ધૃતકૌશિકાદ્ ધૃતકૌશિકઃ પ્રાશર્યાયણાત્ પારશર્યાયણઃ પારાશર્યાત્ પારાશર્યો
જાતૂકર્ણ્યાત્ જાતૂકર્ણ્ય અસુરાયણાચ્ચ યાસ્કાચ્ચ, અસુરાયણસ્ત્રૈવણેઃ, ત્રૈવણિરૌપજન્ધનેઃ,
ઔપજન્ધનિરસુરેઃ, અસુરિર્ભારદ્વાજાદ્ ભારદ્વાજ અત્રેયાદત્રેયો માણ્ટેઃ, માણ્ટિર્ગૌતમાદ્ ગૌતમો
વાત્સ્યાદ્ વાત્સ્યઃ હાણ્ડિલ્યાચ્, છાણ્ડિલ્યઃ કૈશોર્યાત્કાપ્યાત્ કૈશોર્યઃ કાપ્યઃ કુમારહારિતાત્
કુમારહારિતો ગાલવાદ્ ગાલવો વિદર્ભીકૌણ્ડિન્યાદ્ વિદર્ભીકૌણ્ડિન્યો વત્સનપાતો બાભ્રવાદ્
વત્સનપાદ્બાભ્રવઃ પથઃ ષૌભરાત્ પન્થાઃ ષૌભરોઽયાસ્યાદઙ્ગિરસાદાયાસ્ય અઙ્ગિરસ
અભૂતેસ્ત્વાષ્ટ્રાદભૂતિસ્ત્વાષ્ટ્રો વિશ્વરૂપાત્ત્વાષ્ટ્રાદ્ વિશ્વરૂપસ્ત્વાષ્ટ્રોઽશ્વિભ્યામ્
આશ્વિનૌ ડધીચ અથર્વણાદ્ ડધ્યઙ્ઙ્ અથર્વણોઽથર્વણો ડૈવાદાથર્વા ડૈવો મૃત્યોઃ
પ્રાધ્વँસનાન્ મૃત્યુઃ પ્રાધ્વँસનઃ પ્રધ્વँસનાત્ પ્રધ્વँસન એકર્ષેઃ
એકર્ષિર્વિપ્રચિત્તેઃ વિપ્રચિત્તિર્વ્યષ્ટેઃ વ્યષ્ટિઃ ષનારોઃ, ષનારુઃ ષનાતનાત્ ષનાતનઃ
ષનગાત્ ષનગઃ પરમેષ્ઠિનઃ, પરમેષ્ઠી બ્રહ્મણો; બ્રહ્મ સ્વયમ્ભુ, બ્રહ્મણે નમઃ ।
[pnormal]

ch3 = SBM 14.6. = SBK16.6.

ch1

pMK1
જનકો હ વૈદેહો બહુદક્ષિણેન યજ્ઞેનેજે । તત્ર હ
કુરુપઞ્ચાલાનાં બ્રાહ્મણા અભિસમેતા બભૂવુઃ । તસ્ય હ જનકસ્ય વૈદેહસ્ય
વિજિજ્ઞાસા
Ai.gH II 2, paH 142a[Tgrx16]AH +વિજિજ્ઞાસા
બભૂવઃ
કઃ સ્વિદેષાં બ્રાહ્મણાનામનૂચાનતમ ઇતિ ।

pM2/k1

સ હ ગવાᳪं સહસ્રમવરુરોધ; દશ-દશ પાદા એકૈકસ્યાઃ શ‍ૃઙ્ગયોરાબદ્ધા બભૂવુઃ ।

pM2/k2

તાન્હોવાચઃ બ્રાહ્મણા ભગવન્તો, યો વો બ્રહ્મિષ્ઠઃ, સ એતા ગા ઉદજતામિતિ ।
તે હ બ્રાહ્મણા ન દધૃષુઃ ।

pM3/k2

અથ હ યાજ્ઞવલ્ક્યઃ સ્વમેવ બ્રહ્મચારિણમુવાચૈતાઃ, સૌમ્યોદજ, ષામશ્રવાઉ ઇતિ । તા હોદાચકાર । તે હ બ્રાહ્મણાશ્ચુક્રુધુઃ કથં નુ નો બ્રહ્મિષ્ઠો બ્રુવીતેતિ ।

pM4/k2

અથ હ જનકસ્ય વૈદેહસ્ય હોતાશ્વલો બભૂવ । સ હૈનં પપ્રચ્છઃ ત્વં નુ ખલુ નો, યાજ્ઞવલ્ક્ય, બ્રહ્મિષ્ઠોऽસીઉ ઇતિ । સ હોવાચઃ નમો વયં બ્રહ્મિષ્ઠાય કુર્મો; ગોકામા એવ વયᳪं સ્મ ઇતિ । તᳪं હ તત એવ પ્રષ્ટું દધ્રે હોતાશ્વલઃ

pM5/k3

યાજ્ઞવલ્ક્યેતિ હોવાચ, યદિદᳪं સર્વં મૃત્યુનાપ્તᳪं, સર્વં મૃત્યુનાભિપન્નં, કેન યજમાનો મૃત્યોરાપ્તિમતિમુચ્યત ઇતિ । હોત્રર્ત્વિજાગ્નિના વાચા; વાગ્વૈ યજ્ઞસ્ય હોતા । તદ્યેયં વાક્સોऽયમગ્નિઃ સ હોતા સા મુક્તિઃ સાતિમુક્તિઃ ।

pM6/k4

યાજ્ઞવલ્ક્યેતિ હોવાચ, યદિદᳪं સર્વમહોરાત્રાભ્યામાપ્તᳪं, સર્વમહોરાત્રાભ્યામભિપન્નં, કેન યજમાનોऽહોરાત્રયોરાપ્તિમતિમુચ્યત ઇતિ । અધ્વર્યુણર્ત્વિજા ચક્ષુષાદિત્યેન; ચક્ષુર્વૈ યજ્ઞસ્યાધ્વર્યુઃ । તદ્યદિદં ચક્ષુઃ, સોऽસાવાદિત્યઃ; સોऽધ્વર્યુઃ સા મુક્તિઃ સાતિમુક્તિઃ ।

pM7/k5

યાજ્ઞવલ્ક્યેતિ હોવાચ, યદિદᳪं સર્વં પૂર્વપક્ષાપરપક્ષાભ્યામાપ્તᳪं, સર્વં પૂર્વપક્ષાપરપક્ષાભ્યામભિપન્નં, કેન યજમાનઃ પૂર્વપક્ષાપરપક્ષયોરાપ્તિમતિમુચ્યત ઇતિ । બ્રહ્મણર્ત્વિજા મનસા ચન્દ્રેણ; મનો વૈ યજ્ઞસ્ય બ્રહ્મા । તદ્યદિદં મનઃ, સોऽસૌ ચન્દ્રઃ સ બ્રહ્મા સા મુક્તિઃ સાતિમુક્તિઃ ।

pM8/k6

યાજ્ઞવલ્ક્યેતિ હોવાચ, યદિદમન્તરિક્ષમનારમ્બણમિવ; કેનાક્રમેણ
યજમાનઃ સ્વર્ગં લોકમાક્રમત ઇતિ । ઉદ્ગાત્રર્ત્વિજા વયુના પ્રાણેન; પ્રાણો
વૈ યજ્ઞસ્યોદ્ગાતા । તદ્યોઽયં પ્રાણઃ સ વાયુઃ સ ઉદ્ગાતા સા મુક્તિઃ
સાતિમુક્તિઃ । ઇત્યતિમોક્ષા, અથ સમ્પદઃ ।

pM9/k7

યાજ્ઞવલ્ક્યેતિ હોવાચ, કતિભિરયમદ્યર્ગ્ભિર્હોતાસ્મિન્યજ્ઞે કરિષ્યતીતિ ।
તિસૃભિરિતિ । કતમાસ્તાસ્તિસ્ર ઇતિ । પુરોનુવાક્યા ચ યાજ્યા ચ શસ્યૈવ
તૃતીયા । કિં તાભિર્જયતીતિ । પૃથિવીલોકમેવ પુરોનુવાક્યયા જયતિ
અન્તરિક્ષલોકં યાજ્યયા, દ્યૌર્લોકꣳ શસ્યયા

pM10/k8

યાજ્ઞવલ્ક્યેતિ હોવાચ, કત્યયમદ્યાધ્વર્યુરસ્મિન્યજ્ઞ આહુતીર્હોષ્યતીતિ ।
તિસ્ર ઇતિ । કતમાસ્તાસ્તિસ્ર ઇતિ । યા હુતા ઉજ્જ્વલન્તિ, યા હુતા અતિનેદન્તિ,
યા હુતા અધિશેરતે । કિં તાભિર્જયતીતિ । યા હુતા ઉજ્જ્વલન્તિ, દેવલોકમેવ
તાભિર્જયતિઃ દીપ્યત ઇવ હિ દેવલોકો । યા હુતા અતિનેદન્તિ, મનુષ્યલોકમ્

K પિત્ર઼્ઇલોકમ્

એવ તાભિર્જયતિ અતીવ હિ મનુષ્યલોકો

K પિત્ર઼્ઇલોકો

યા હુતા અધિશેરતે, પિતૃલોકમ્

K મનુષ્યલોકમ્

એવ તાભિર્જયતિ અધ ઇવ હિ પિતૃલોકઃ

K મનુષ્યલોકઃ

pM11/k9

યાજ્ઞવલ્ક્યેતિ હોવાચ, કતિભિરયમદ્ય બ્રહ્મા યજ્ઞં દક્ષિણતો
દેવતાભિર્ગોપાયિષ્યતીત્યેકયેતિ । કતમા સૈકેતિ ।
મન એવેતિ । અનન્તં વૈ મનો, અનન્તા વિશ્વે
દેવા । અનન્તમેવ સ તેન લોકં જયતિ ।

K ગોપાયતીત્યેકયેતિ

pM12/k10

યાજ્ઞવલ્ક્યેતિ હોવાચ, કત્યયમદ્યોદ્ગાતાસ્મિન્યજ્ઞે સ્તોત્રિયાઃ સ્તોષ્યતીતિ ।

તિસ્ર ઇતિ । કતમાસ્તાસ્તિસ્ર ઇતિ । પુરોનુવાક્યા ચ યાજ્યા ચ શસ્યૈવ
તૃતીયાધિદેવતમ્ અથાધ્યત્મં
K ૐ અધિદેવતમ્...

કતમાસ્તા યા અધ્યાત્મમિતિ । પ્રાણ એવ પુરોનુવાક્યાપાનો યાજ્યા, વ્યાનઃ
શસ્યા । કિં તાભિર્જયતીતિ । યત્કિઞ્ચેદં પ્રાણભૃદિતિ
K પ્રો યત્...

schribit પ્ૠ્ઇથિવીલોકમેવ પુરોનુવાક્યયા જયતિ
તતો હ હોતાશ્વલ ઉપરરામ ।

ch2

pMK1
અથ હૈનં જારત્કારવ આર્તભાગઃ પપ્રચ્છ । યાજ્ઞવલ્ક્યેતિ
હોવાચ, કતિ ગ્રહાઃ, કત્યતિગ્રહા ઇતિ । અષ્ટૌ ગ્રહા, અષ્ટાવતિગ્રહા ઇતિ ।
યે તેઽષ્ટૌ ગ્રહા, અષ્ટાવતિગ્રહાઃ, કતમે ત ઇતિ ।

pMK2
પ્રાણો વૈ ગ્રહઃ । સોઽપાનેનાતિગ્રહેણ
K સ ગન્ધેનાતિગ્રહેણ

ગૃહીતો । અપાનેન
K પ્રાણેન

હિ ગન્ધાઞ્જિઘ્રતિ ।

pM3/k4
જિહ્વા વૈ ગ્રહઃ । સ રસેનાતિગ્રહેણ ગૃહીતો; જિહ્વયા હિ રસાન્વિજાનાતિ ।

pM4/k3
વાગ્વૈ ગ્રહઃ । સ નામ્નાતિગ્રહેણ ગૃહીતો; વાચા હિ નામાન્યભિવદતિ ।

pMK5
ચક્ષુર્વૈ ગ્રહઃ । સ રૂપેણાતિગ્રહેણ ગૃહીતશ્; ચક્ષુષા હિ રૂપાણિ
પશ્યતિ ।

pMK6
શ્રોત્રં વૈ ગ્રહઃ । સ શબ્દેનાતિગ્રહેણ ગૃહીતઃ; શ્રોત્રેણ હિ

શબ્દાઞ્છૃણોતિ ।

pMK7

મનો વૈ ગ્રહઃ । સ કામેનાતિગ્રહેણ ગૃહીતો; મનસા હિ કામાન્કામયતે ।

pMK8

હસ્તૌ વૈ ગ્રહઃ । સ કર્મણાતિગ્રહેણ ગૃહીતો; હસ્તાભ્યાꣳ હિ કર્મ
કરોતિ ।

pMK9

ત્વગ્વૈ ગ્રહઃ । સ સ્પર્શેનાતિગ્રહેણ ગૃહીતસ્; ત્વચા હિ સ્પર્શાન્વેદયત ।
ઇત્યષ્ટૌ ગ્રહા, અષ્ટાવતિગ્રહાઃ ।

pMK10

યાજ્ઞવલ્ક્યેતિ હોવાચ, યદિદꣳ સર્વં મૃત્યોરન્નં, કા સ્વિત્સા દેવતા,
યસ્યા મૃત્યુરન્નમિતિ । અગ્નિર્વૈ મૃત્યુઃ, સોઽપામન્નમ્ અપ પુનર્મૃત્યું
જયતિ ।

pM11/k12

યાજ્ઞવલ્ક્યેતિ હોવાચ, યત્રાયં પુરુષો મ્રિયતે, કિમેનં ન જહાતીતિ ।
નામેતિ અનન્તં વૈ નામાનન્તા વિશ્વે દેવા; અનન્તમેવ સ તેન લોકં
જયતિ ।

pM12/k11

યાજ્ઞવલ્ક્યેતિ હોવાચ, યત્રાયં પુરુષો મ્રિયત, ઉદસ્માત્પ્રાણાઃ ક્રામન્તિ
આહો નેતિ । નેતિ હોવાચ યાજ્ઞવલ્ક્યો, અત્રૈવ સમવનીયન્તે, સ ઉચ્છ્વયતિ
આધ્માયતિ આધ્માતો મૃતઃ શેતે ।

pMK13

યાજ્ઞવલ્ક્યેતિ હોવાચ, યત્રાસ્ય પુરુષસ્ય મૃતસ્યાગ્નિં વાગપ્યેતિ, વાતં
પ્રાણશ્, ચક્ષુરાદિત્યં, મનશ્ચન્દ્રં, દિશઃ શ્રોત્રં, પૃથિવીꣳ
શરીરમ્ આકાશમાત્મૌષધીર્લોમાનિ, વનસ્પતીન્કેશા, અપ્સુ લોહિતં ચ
રેતશ્ચ નિધીયતે, ક્વાયં તદા પુરુષો ભવતીતિ । આહર, સૌમ્ય, હસ્તમ્ ।

pM14/k13

આર્તભાગેતિ હોવાચાવામ્
K ૐ ઇતિ હોવાચ

એવૈતદ્
 K એવૈતસ્ય

વેદિષ્યાવો;
ન નાવેતત્સજન ઇતિ । તૌ હોત્ક્રમ્ય મન્ત્રયાં ચક્રતુસ્
 K ચક્રાતે

તૌ હ યદૂચતુઃ, કર્મ હૈવ તદૂચતુરથ હ યત્પ્રશꣳસતુઃ, કર્મ
હૈવ તત્પ્રશꣳસતુઃ પુણ્યો વૈ પુણ્યેન કર્મણા ભવતિ, પાપઃ પાપેનેતિ ।
તતો હ જારત્કારવ આર્તભાગ ઉપરરામ ।

ch3

pMK1
અથ હૈનં ભુજ્યુર્લાહ્યાયનિઃ પપ્રચ્છ । યાજ્ઞવલ્ક્યેતિ
હોવાચ, મદ્રેષુ ચરકાઃ પર્યવ્રજામ; તે પતઞ્ચલસ્ય કાપ્યસ્ય ગૃહાનૈમ ।
તસ્યાસીદ્દુહિતા ગન્ધર્વગૃહીતા; તમપૃચ્છામઃ કોઽસીતિ । સોઽબ્રવીત્
સુધન્વાઙ્ગિરસ ઇતિ । તં યદા લોકાનામન્તાનપૃચ્છામાથૈતદ્
 K અથૈનમ્

અબ્રૂમઃ ક્વ પારિક્ષિતા અભવન્નિતિ । ક્વ પારિક્ષિતા અભવન્નિતિ ।
 K અભવન્ત્।

તત્
 K સ

ત્વા પૃચ્છામિ, યાજ્ઞવલ્ક્યઃ ક્વ પારિક્ષિતા અભવન્નિતિ ।

pMK2
સ હોવાચોવાચ વૈ સ તદગચ્છન્વૈ તે તત્ર, યત્રાશ્વમેધયાજિનો
ગચ્છન્તીતિ । ક્વ ન્વશ્વમેધયાજિનો ગચ્છન્તીતિ । દ્વાત્રિꣳશત વૈ
દેવરથાહ્ન્યાન્યયં લોકસ્; તꣳ સમન્તં લોકં દ્વિસ્તાવત્પૃથિવી
 K સમન્તં પૃ઼ઇથિવી દ્વિસ્તાવત્

પર્યેતિ; તાꣳ
 K તાꣳ સમન્તં

એતદ્વ્યાખ્યાસ્યામિ તે;

વ્યાચક્ષાણસ્ય તુ મે નિદિધ્યાસસ્વેતિ
બ્રવિતુ ભગવાનિતિ
K ૐ

pMK6
સ હોવાચ યાજ્ઞવલ્ક્યો
K ૐ

ન વા અરે પત્યુઃ કામાય પતિઃ પ્રિયો ભવતિ આત્મનસ્તુ કામાય પતિઃ પ્રિયો ભવતિ; ન વા અરે જાયાયૈ કામાય જાયા પ્રિયા ભવતિ આત્મનસ્તુ કામાય જાયા પ્રિયા ભવતિ; ન વા અરે પુત્રાણાં કામાય પુત્રાઃ પ્રિયા ભવન્તિ આત્મનસ્તુ કામાય પુત્રાઃ પ્રિયા ભવન્તિ; ન વા અરે વિત્તસ્ય કામાય વિત્તં પ્રિયં ભવતિ આત્મનસ્તુ કામાય વિત્તં પ્રિયં ભવતિ; ન વા અરે બ્રહ્મણઃ કામાય બ્રહ્મ પ્રિયં ભવતિ આત્મનસ્તુ કામાય બ્રહ્મ પ્રિયં ભવતિ; ન વા અરે ક્ષત્રસ્ય કામાય ક્ષત્રં પ્રિયં ભવતિ આત્મનસ્તુ કામાય ક્ષત્રં પ્રિયં ભવતિ; ન વા અરે લોકાનાં કામાય લોકાઃ પ્રિયા ભવન્તિ આત્મનસ્તુ કામાય લોકાઃ પ્રિયા ભવન્તિ; ન વા અરે દેવાનાં કામાય દેવાઃ પ્રિયા ભવન્તિ આત્મનસ્તુ કામાય દેવાઃ પ્રિયા ભવન્તિ; ન વા અરે ભૂતાનાં કામાય ભૂતાનિ પ્રિયાણિ ભવન્તિ આત્મનસ્તુ કામાય ભૂતાનિ પ્રિયાણિ ભવન્તિ; ન વા અરે સર્વસ્ય કામાય સર્વં પ્રિયં ભવતિ આત્મનસ્તુ કામાય સર્વં પ્રિયં ભવતિ આત્મા વા અરે દ્રષ્ટવ્યઃ શ્રોતવ્યો મન્તવ્યો નિદિધ્યાસિતવ્યો, મૈત્રેયિ આત્મનો વા અરે દર્શનેન શ્રવણેન મત્યા વિજ્ઞાનેનેદꣳ સર્વં વિદિતમ્ ।

pMK7
બ્રહ્મ તં પરાદાદ્ યોઽન્યત્રાત્મનો વેદાન્વેદ; વેદાસ્તં પરાદુઃ
યોઽન્યત્રાત્મનો વેદાન્વેદ; યજ્ઞાસ્તં પરાદુઃ
યોઽન્યત્રાત્મનો યજ્ઞાન્વેદ
Kadd

યોઽન્યત્રાત્મનો બ્રહ્મ વેદ; ક્ષત્રં તં પરાદાદ્ યોઽન્યત્રાત્મનઃ ક્ષત્રં વેદ; લોકાસ્તં
પરાદુઃ યોઽન્યત્રાત્મનો લોકાન્વેદ; દેવાસ્તં પરાદુઃ યોઽન્યત્રાત્મનો દેવાન્વેદ; વેદાસ્તં પરાદુઃ

યોઽન્યત્રાત્મનો વેદાન્વેદ
ભૂતાનિ તં પરાદુઃ યોઽન્યત્રાત્મનો ભૂતાનિ વેદ; સર્વં તં પરાદાદ્
યોઽન્યત્રાત્મનઃ સર્વં વેદ; ઇદં બ્રહ્મેદં ક્ષત્રમિમે લોકા ઇમે દેવા
ઇમે વેદા ઇમાનિ ભૂતાનીદઁ સર્વં યદયમાત્મા ।

pMK8

સ યથા દુન્દુભેર્હન્યમાનસ્ય ન બાહ્યાઞ્છબ્દાઞ્છક્નુયાદ્ગ્રહણાય, દુન્દુભેસ્
તુ ગ્રહણેન દુન્દુભ્યાઘાતસ્ય વા શબ્દો ગૃહીતઃ ।

pM9/k10

સ યથા વીણાયૈ વાદ્યમાનાયૈ ન બાહ્યાઞ્છબ્દાઞ્છક્નુયાદ્ગ્રહણાય, વીણાયૈ
તુ ગ્રહણેન વીણાવાદસ્ય વા શબ્દો ગ્રહીતઃ ।

pM10/k9

સ યથા શઙ્ખસ્ય ધ્માયમાનસ્ય ન બાહ્યાઞ્છબ્દાઞ્છક્નુયાદ્ગ્રહણાય,
શઙ્ખસ્ય તુ ગ્રહણેન શઙ્ખધ્મસ્ય વા શબ્દો ગૃહીતઃ ।

pMK11

સ યથાર્દ્રૈધાગ્નેરભ્યાહિતસ્ય પૃથગ્ધૂમા વિનિશ્ચરન્તિ એવં વા અરેઽસ્ય
મહતો ભૂતસ્ય નિશ્વસિતમ્
K નિઃશ્વસિતમ્

એતદ્યદૃગ્વેદો યજુર્વેદઃ સામવેદોઽથર્વાઙ્ગિરસ ઇતિહાસઃ પુરાણં વિદ્યા
ઉપનિષદઃ શ્લોકાઃ સૂત્રાણ્યનુવ્યાખ્યાનાનિ વ્યાખ્યાનનિ દત્તમ્
K ઇષ્ટં

હુતમાશિતં પાયિતમયં ચ લોકઃ
પરશ્ચ લોકઃ સર્વાણિ ચ ભૂતાન્યસ્યૈવૈતાનિ સર્વાણિ
નિશ્વસિતાનિ
K નિઃશ્વસિતાનિ

pMK12

સ યથા સર્વાસામપાઁ સમુદ્ર એકાયનમ્
એવઁ સર્વેષાઁ સ્પર્શાનાં ત્વગેકાયનમ્

એવꣳ સર્વેષાં ગન્ધાનાં નાસિકે એકાયનમ્
એવꣳ સર્વેષાꣳ રસાનાં જિહ્વૈકાયનમ્
એવꣳ સર્વેષાꣳ રૂપાણાં ચક્ષુરેકાયનમ્
એવꣳ સર્વેષં શબ્દાનાં શ્રોત્રમેકાયનમ્
એવꣳ સર્વેષાꣳ સઙ્કલ્પાનાં મન એકાયનમ્
K મન એકાયનમ્

એવꣳ સર્વેષાં વેદાનાં હૃદયમેકાયનમ્
એવꣳ સર્વેષાં કર્મણાꣳ હસ્તાવેકાયનમ્
એવꣳ સર્વેષામધ્વનાં પાદાવેકાયનમ્
એવꣳ સર્વેષામાનન્દાનામુપસ્થ એકાયનમ્
એવꣳ સર્વેષાં વિસર્ગાણાં પાયુરેકાયનમ્
એવꣳ સર્વાસાં વિદ્યાનાꣳ વાગેકાયનમ્

pMK13
સ યથા સૈન્ધવઘનોઽનન્તરોઽબાહ્યઃ કૃત્સ્નો રસઘન એવ સ્યાદ્
K ૐ

એવં વા અરે ઇદં મહદ્ભૂતમનન્તમપરં
K અરેઽયમાત્માનન્તરોઽબાહ્યઃ

કૃત્સ્નઃ પ્રજ્ઞાનઘન એવૈતેભ્યો ભૂતેભ્યઃ સમુત્થાય તાનિઽ એવાનુવિનયતિ;
ન પ્રેત્ય સઞ્જ્ઞાસ્તીત્યરે બ્રવિમીતિ હોવાચ યાજ્ઞવલ્ક્યઃ ।

pMK14
સા હોવાચ મૈત્રેયિ અત્રૈવ મા ભગવાન્મોહાન્તમાપીપદન્ ન વા અહમિમં
વિજાનામીતિઃ ન પ્રેત્ય સઞ્જ્ઞાસ્તીતિ
K ૐ ન ...

pM15/k14
સ હોવાચ યાજ્ઞવલ્ક્યો
K ૐ

ન વા અરેઽહં મોહં બ્રવીમિ અવિનાશી વા અરેઽયમાત્માનુચ્છિત્તિધર્મા,
માત્રાસꣳ સર્ગસ્ત્વસ્ય ભવતિ
K ૐ માત્રાક્ષ્ ...

pMK16

pro m16-25, K schribit15; vide infra

યદ્વૈ તન્ન પશ્યતિ, પશ્યન્વૈ તદ્દ્રષ્ટવ્યં ન પશ્યતિ; ન હિ
દ્રષ્ટુર્દૃષ્ટેર્વિપરિલોપો વિદ્યતેઽવિનાશિત્વાન્ ન તુ તદ્દ્વિતીયમસ્તિ,
તતોઽન્યદ્વિભક્તં યત્પશ્યેત્ ।

pMK17

pro m16-25, K schribit15; vide infra

યદ્વૈ તન્ન જિઘ્રતિ, જિઘ્રન્વૈ તદ્ઘ્રાતવ્યં ન જિઘ્રતિ; ન હિ
ઘ્રાતુર્ઘ્રાતેર્વિપરિલોપો વિદ્યતેઽવિનાશિત્વાન્ ન તુ તદ્દ્વિતીયમસ્તિ,
તતોઽન્યદ્વિભક્તં યજ્ જિઘ્રેત્

pMK18

pro m16-25, K schribit15; vide infra

યદ્વૈ તન્ન રસયતિ, વિજાનન્વૈ તદ્રસં ન રસયતિ; ન હિ
રસયિતૂ રસાદ્વિપરિલોપો વિદ્યતેઽવિનાશિત્વાન્ ન તુ તદ્દ્વિતીયમસ્તિ,
તતોઽન્યદ્વિભક્તં યદ્રસયેત્ ।

pMK19

pro m16-25, K schribit15; vide infra

યદ્વૈ તન્ન વદતિ, વદન્વૈ તદ્વક્તવ્યં ન વદતિ; ન હિ વક્તુર્વચો
વિપરિલોપો વિદ્યતેઽવિનાશિત્વાન્ ન તુ તદ્દ્વિતીયમસ્તિ, તતોઽન્યદ્વિભક્તં
યદ્વદેત્ ।

pMK20

pro m16-25, K schribit15; vide infra

યદ્વૈ તન્ન શ઼ૃણોતિ, શ઼ૃણ્વન્વૈ તચ્છ્રોતવ્યં ન શ઼ૃણોતિ; ન
હિ શ્રોતુઃ શ્રુતેર્વિપરિલોપો વિદ્યતેઽવિનાશિત્વાન્ ન તુ તદ્દ્વિતીયમસ્તિ,
તતોઽન્યદ્વિભક્તં યચ્છૃણુયાત્ ।

pMK21

pro m16-25, K schribit15; vide infra

યદ્વૈ તન્ન મનુતે, મન્વાનો વૈ તન્મન્તવ્યં ન મનુતે; ન હિ
મન્તુર્મતેર્વિપરિલોપો વિદ્યતેઽવિનાશિત્વાન્ ન તુ તદ્દ્વિતીયમસ્તિ,
તતોઽન્યદ્વિભક્તં યન્મન્વીત ।

pMK22

pro m16-25, K schribit15; vide infra

યદ્વૈ તન્ન સ્પૃશતિ, સ્પૃશન્વૈ તત્સ્પ્રષ્ટવ્યં ન સ્પૃશતિ; ન હિ સ્પ્રષ્ટુઃ સ્પૃષ્ટેર્વિપરિલોપો વિદ્યતેઽવિનાશિત્વાન્ન તુ તદ્દ્વિતીયમસ્તિ, તતોઽન્યદ્વિભક્તં યત્સ્પૃશેત્ ।

pMK23

pro m16-25, K schribit15; vide infra

યદ્વૈ તન્ન વિજાનાતિ, વિજાનન્વૈ તદ્વિજ્ઞેયં ન વિજાનાતિ; ન હિ વિજ્ઞાતુર્વિજ્ઞાનાદ્વિપરિલોપો વિદ્યતેઽવિનાશિત્વાન્ન તુ તદ્દ્વિતીયમસ્તિ, તતોઽન્યદ્વિભક્તં યદ્વિજાનીયાત્ ।

pM24

pro m16-25, K schribit15; vide infra

યત્ર વા અન્યદિવ સ્યાત્ તત્રઽન્યોઽન્યત્પશ્યેદન્યોઽન્યજ્ જિઘ્રેદન્યોઽન્યદ્રસયેદન્યોઽન્યદ્વદેદન્યોઽન્યચ્છૃણુયાદ્ અન્યોઽન્યન્મન્વીતાન્યોઽન્યત્સ્પૃશેદન્યોઽન્યદ્વિજાનીયાત્ ।

pM25

pro m16-25, K schribit15; vide infra

યત્ર ત્વસ્ય સર્વમાત્મૈવાભૂત્ તત્કેન કં પશ્યેત્ તત્કેન કં જિઘ્રેત્ તત્કેન કꣳ રસયેત્ તત્કેન કમભિવદેત્ તત્કેન કં શꣳૃણુયાત્ તત્કેન કં મન્વીત, તત્કેન કꣳ સ્પૃશેત્ તત્કેન કં વિજાનીયાદ્ । યેનેદꣳ સર્વં વિજાનાતિ, તં કેન વિજાનીયાદ્ । વિજ્ઞાતારમરે કેન વિજાનીયાદિત્ય્ ઉક્તાનુશાસનાસિ, મૈત્રેયિ એતાવદરે ખલ્વમૃતત્વમિતિ હોક્ત્વા યાજ્ઞવલ્ક્યો પ્રવવ્રજ ।

pK15

K schribitpro m24-25; vide supra

યત્ર હિ દ્વૈતમિવ ભવતિ, તદિતર ઇતરં પશ્યતિ, તદિતર ઇતરં જિઘ્રતિ, તદિતર ઇતરꣳ રસયતિ, તદિતર ઇતરમભિવદતિ, તદિતર ઇતરꣳ શꣳૃણોતિ, તદિતર ઇતરં મનુતે, તદિતર ઇતરꣳ સ્પૃશતિ, તદિતર ઇતરં વિજાનાતિ । યત્ર ત્વસ્ય સર્વમાત્મૈવાભૂત્ તત્કેન કં પશ્યેત્ તત્કેન કં જિઘ્રેત્ તત્કેન કꣳ રસયેત્ તત્કેન કમભિવદેત્ તત્કેન કꣳ શꣳૃણુયાત્ તત્કેન કં મન્વીત,

તત્કેન કꣳ સ્પૃશેત્ તત્કેન કં વિજાનીયાદ્ । યેનેદꣳ સર્વં વિજાનાતિ,
તં કેન વિજાનીયાત્ । સ એષ નેતિ નેત્યાત્માગૃહ્યો ન હિ ગૃહ્યતે, અશીર્યો ન હિ
શીર્યતે, અસઙ્ગો ન હિ સજ્યતે, અસિતો ન વ્યથતે ન રિષ્યતિ । વિજ્ઞાતારમરે કેન
વિજાનીયાદિત્યુક્તાનુશાસનાસિ, મૈત્રેયિ એતાવદરે ખલ્વમૃતત્વમિતિ હોક્ત્વા યાજ્ઞવલ્ક્યો
વિજહાર । [પનુસ્તુબ્]

pM26

pro m5,26-28, schribitkrishna 6; vide infra

અથ વꣳશઃ । તદિદં વયં હૌર્પણાય્યાચ્, છૌર્પણાય્યો ગૌતમાદ્
ગૌતમો વત્સ્યાદ્ વત્સ્યો વાત્સ્યાચ્ચ પારાશર્યાચ્ચ, પારાશર્યઃ ષાઙ્કૃત્યાચ્ચ
ભારદ્વાજાચ્ચ, ભારદ્વાજ ઔદાવહેશ્ચ હાણ્ડિલ્યાચ્ચ, હાણ્ડિલ્યો વૈજવાપાચ્ચ
ગૌતમાચ્ચ, ગૌતમો વૈજવાપાયનાચ્ચ વૈષ્ટપુરેયાચ્ચ, વૈષ્ટપુરેયઃ
હાણ્ડિલ્યાચ્ચ રૌહિણાયનાચ્ચ, રૌહિણાયનઃ હૌનકાચ્ચ જૈવન્તાયનાચ્ચ
રૈભ્યાચ્ચ, રૈભ્યઃ પૌતિમાષ્યાયણાચ્ચ કૌણ્ડિન્યાયનાચ્ચ, કૌણ્ડિન્યાયનઃ
કૌણ્ડિન્યાભ્યાં, કૌણ્ડિન્યા ઔર્ણવાભેભ્યઃ, ઔર્ણવાભાઃ કૌણ્ડિન્યાત્ કૌણ્ડિન્યઃ
કૌણ્ડિન્યાચ્ચાગ્નિવેશ્યાચ્ચ,

pM27

pro m5,26-28, schribitkrishna 6; vide infra

અગ્નિવેશ્યઃ ષૌતવાત્ ષૌતવઃ પારાશર્યાત્ પારાશર્યો જાતુકર્ણ્યાત્ જાતુકર્ણ્યો
ભારદ્વાજાદ્ ભારદ્વાજો ભારદ્વાજાચ્ચાસુરાયણાચ્ચ ગૌતમાચ્ચ, ગૌતમો ભારદ્વાજાદ્
ભારદ્વાજો વલાકાકૌશિતાદ્ વલાકાકૌશિતઃ કાષાયણાત્ કાષાયણઃ ષૌકરાયનાત્
ષૌકરાયનસ્ત્રૈવણેઃ ત્રૈવણિરાઉપજન્ધનેઃ આઉપજન્ધનિર્ષાયિકાયનાત્
ષાયકાયનઃ કૌશિકાયનેઃ, કૌશિકાયનિર્ઘૃતકૌશિકાદ્ ઘૃતકૌશિકઃ પારાશર્યાત્
પારાશર્યઃ પારાશર્યાત્ પારાશર્યઃ જાતુકર્ણ્યાત્ જાતુકર્ણ્યો ભારદ્વાજાદ્ ભારદ્વાજો
ભારદ્વાજાચ્ચાસુરાયણાચ્ચસ્કાચ્ચ, અસુરાયણસ્ત્રૈવણેઃ ત્રૈવણિરાઉપજન્ધનેઃ
આઉપજન્ધનિઃઅસુરેરસુરિર્ભારદ્વાજાદ્ ભારદ્વાજો અત્રેયાત્

pM28

pro m5,26-28 schribitkrishna 6; vide infra

અત્રેયો માણ્ટેઃ, માણ્ટિર્ગૌતમાદ્ ગૌતમો ગૌતમાદ્ ગૌતમો વાત્સ્યાદ્ વાત્સ્યઃ
હાણ્ડિલ્યાચ્, છાણ્ડિલ્યઃ કૈશોર્યાત્કાપ્યાત્ કૈશોર્યઃ કાપ્યઃ કુમારહરિતાત્
કુમારહરિતો ગાલવાદ્ ગાલવો વિદર્ભીકૌણ્ડિન્યાદ્ વિદર્ભીકૌણ્ડિન્યો વત્સનપાતો બાભવાદ્
વત્સનપાદ્બાભવઃ પથઃ ષૌભરાત્ પન્થાઃ ષૌભરોઙયાસ્યાદાઙ્ગિરસાદ્

આયાસ્યોઽઙ્ગિરસઽભુતેસ્ત્વાષ્ટ્રાદાભુતિઃ ત્વાષ્ટ્રો વિશ્વરૂપાત્ત્વાષ્ટ્રાદ્
વિશ્વરૂપસ્ત્વાષ્ટ્રોઽશ્વિભ્યાં, આશ્વિનૌ ઽધિચ અથર્વણાદ્ ઽધ્યઙ્ઙ્
અથર્વણોઽથર્વણો  ડૈવાદાથર્વા ડૈવોઃ મૃત્યોઃ  પ્રાધ્વઁ સનાન્ મૃત્યુઃ
પ્રાધ્વઁ સનઃ પ્રાધ્વઁ સનાન્ પ્રાધ્વઁ સનઃ એકર્ષેઃ  એકર્ષિર્વિપ્રજિત્તેઃ
વિપ્રજિત્તિર્વ્યષ્ટેઃ વ્યષ્ટિઃ ષનારોઃ, ષનારુઃ ષનાતનાત્ ષનાતનઃ ષનગાત્
ષનગઃ પરમેષ્ટિણઃ, પરમેષ્ટી  બ્રહ્મણો । બ્રહ્મ સ્વયમ્ભૂ બ્રહ્મ નમઃ ।

chk6

schribitpro m5,26-28

pK1

અથ વઁ શઃ પશુતિમાષ્યો ગૌપવનાદ્ ગૌપવનઃ પશુતિમાષ્યાત્ પશુતિમાષ્યો
ગૌપવનાદ્ ગૌપવનઃ કૌશિકાત્ કૌશિકઃ કૌણ્ડિન્યાત્ કૌણ્ડિન્યઃ હાણ્ડિલ્યાચ્, છાણ્ડિલ્યઃ
કૌશિકાચ્ચ ગૌતમાચ્ચ, ગૌતમો

pK2

અગ્નિવેશ્યાદગ્નિવેશ્યો ગાર્ગ્યાદ્ ગાર્ગ્યો ગાર્ગ્યાદ્ ગાર્ગ્યો ગૌતમાદ્ ગૌતમઃ ષૈતવાત્
ષૈતવઃ પારાશર્યાયણાત્ પારાશાર્યાયણો ગાર્ગ્યાયણાદ્ ગાર્ગ્યાયણ ઊદ્દાલકાયનાદૂદ્દાલકાયનો
જાબાલાયનાત્ જાબાલાયનો માધ્યન્દિનાયનાન્ માધ્યન્દિનાયનઃ ષૌકરાયણાત્ ષૌકરાયણઃ
કાષાયણાત્ કાષાયણઃ ષાયકાયનાત્ ષાયકાયનઃ કૌશિકાયનેઃ, કૌશિકાયનિઃ

pK3

ધૃતકૌશિકાદ્ ધૃતકૌશિકઃ પ્રાશર્યાયણાત્ પારશર્યાયણઃ પારાશર્યાત્
પારાશર્યો જાતૂકર્ણ્યાત્ જાતૂકર્ણ્ય અસુરાયણાચ્ચ યાસ્કાચ્ચ, અસુરાયણસ્ત્રૈવણેઃ
ત્રૈવણિરૌપજન્ધનેઃ, ઔપજન્ધનિરસુરેઃ, અસુરિર્ભારદ્વાજાદ્ ભારદ્વાજ
અત્રેયાદત્રેયો માણ્ટેઃ, માણ્ટિર્ગૌતમાદ્ ગૌતમો ગૌતમાદ્ ગૌતમો વાત્સ્યાદ્
વાત્સ્યઃ હાણ્ડિલ્યાચ્, છાણ્ડિલ્યઃ કૈશોર્યાત્કાપ્યાત્ કૈશોર્યઃ કાપ્યઃ કુમારહારિતાત્
કુમારહારિતો ગાલવાદ્ ગાલવો વિદર્ભીકૌણ્ડિન્યાદ્ વિદર્ભીકૌણ્ડિન્યો વત્સનપાતો બાભ્રવાદ્
વત્સનપાદ્બાભ્રવઃ પથઃ ષૌભરાત્ પન્થાઃ ષૌભરોઽયાસ્યાદઙ્ગિરસાદાયાસ્ય અઙ્ગિરસ
અભૂતેસ્ત્વાષ્ટ્રાદભૂતિસ્ત્વાષ્ટ્રો વિવરૂપાત્ત્વાષ્ટ્રાદ્ વિશ્વરૂપસ્ત્વાષ્ટ્રોઽશ્વિભ્યામ્
આશ્વિનૌ ઽધીચ અથર્વણાદ્ ઽધ્યઙ્ઙ્ અથર્વણોઽથર્વણો ડૈવાદાથર્વા
ડૈવો મૃત્યોઃ પ્રાધ્વઁ સનાન્ મૃત્યુઃ  પ્રાધ્વઁ સનઃ પ્રધ્વઁ સનાત્
પ્રધ્વઁ સન એકર્ષેઃ, એકર્ષિર્વિપ્રચિત્તેઃ, વિપ્રચિત્તિર્વ્યષ્ટેઃ, વ્યષ્ટિઃ
ષનારોઃ, ષનારુઃ ષનાતનાત્ ષનાતનઃ ષનગાત્ ષનગઃ પરમેષ્ઠિનઃ, પરમેષ્ઠી

બ્રહ્મણો, બ્રહ્મ સ્વયમ્ભુ, બ્રહ્મણે નમઃ । [pnormal]

ch5 = SBM 14.8 = SBK16.7

ch1

પૂર્ણમદઃ, પૂર્ણમિદં, પૂર્ણાત્પૂર્ણમુદચ્યતે । પૂર્ણસ્ય પૂર્ણમાદાય,
પૂર્ણમેવાવશિષ્યતે । ખં બ્રહ્મ, ખં પુરાણં, વાયુરં ખમ્ ઇતિ હ સ્માહ
કૌરવ્યાયણીપુત્રો । વેદોઽયં, બ્રાહ્મણા વિદુઃ વેદૈનેન યદ્વેદિતવ્યમ્ ।

ch2

pMK1

ત્રયાઃ પ્રાજાપત્યાઃ પ્રજાપતૌ પિતરિ બ્રહ્મચર્યમૂષુઃ દેવા મનુષ્યા અસુરાઃ ।

pM2/k1

ઉષિત્વા બ્રહ્મચર્યં દેવા ઊચુઃ બ્રવીતુ નો ભવાનિતિ । તેભ્યો
હૈતદક્ષરમુવાચઃ દ ઇતિ; વ્યજ્ઞાસિષ્ટાઉ ઇતિ । વ્યજ્ઞાસિષ્મેતિ હોચુઃ
દામ્યતેતિ ન આત્થેતિ । ઓમિતિ હોવાચ, વ્યજ્ઞાસિષ્ટેતિ ।

pM3/k2

અથ હૈનં મનુષ્યા ઊચુઃ બ્રવીતુ નો ભવાનિતિ । તેભ્યો હૈતદેવાક્ષરમુવાચઃ
દ ઇતિ; વ્યજ્ઞાસિષ્ટાઉ ઇતિ । વ્યજ્ઞાસિષ્મેતિ હોચુઃ દત્તેતિ ન આત્થેતિ । ઓમિતિ
હોવાચ, વ્યજ્ઞાસિષ્ટેતિ ।

pM4/k3

અથ હૈનમસુરા ઊચુઃ બ્રવીતુ નો ભવાનિતિ । તેભ્યો હૈતદેવાક્ષરમુવાચઃ
દ ઇતિ; વ્યજ્ઞાસિષ્ટાઉ ઇતિ । વ્યજ્ઞાસિષ્મેતિ હોચુઃ દયધ્વમિતિ ન આત્થેતિ ।
ઓમિતિ હોવાચ, વ્યજ્ઞાસિષ્ટેતિ । તદેતદેવૈષા દૈવી વાગનુવદતિ
સ્તનયિત્નુઃ દદદ ઇતિ; દમ્યત દત્ત દયધ્વમિતિ । તદેતત્ત્રયઁ
શિક્ષેદ્ દમં, દાનં, દયામિતિ ।

chM3/k om .

વાયુરનિલમમૃતં ભસ્મન્તઁ શરીરમ્ । ઓ૩મ્ ક્રતો સ્મર, ક્લિબે સ્મર,
કૃતઁ સ્મરા- । -ગ્ને, નય સુપથા રાયે અસ્માન્ વિશ્વાનિ, દેવ, વયુનાનિ
વિદ્વાન્ યુયોધ્યસ્મજ્ જુહુરાણમેનો ભૂયિષ્ઠાં તે નમઃઉક્તિં વિધેમ ।

chM4/k3

એષ પ્રજાપતિર્યદ્ધૃદયમ્ એતદ્બ્રહ્મૈતત્સર્વમ્ । તદેતત્ત્ર્યક્ષરઁ :

હૃદયમિતિ । હૃ ઇત્યેકમક્ષરમ્ અભિહરન્ત્યસ્મૈ સ્વાશ્ચાન્યે  ચ, ય
એવં  વેદ । દ  ઇત્યેકમક્ષરમ્ દદન્ત્ય્
K  દદત્ય્

અસ્મૈ સ્વાશ્ચાન્યે  ચ, ય  એવં  વેદ । યમિત્યેકમક્ષરમ્ એતિ સ્વર્ગં
લોકં, ય  એવં  વેદ ।

chM5/k4

તદ્વૈ  તદેતદેવ  તદાસ, સત્યમેવ  । સ  યો  હ એવમ્
K  ૐ

એતન્મહદ્યક્ષં  પ્રથમજં  વેદઃ સત્યં  બ્રહ્મેતિ, જયતીમાઁ લ્ લોકાન્ ।
જિત  ઇન્ન્વસાવસદ્ ય  એવમેતન્મહદ્યક્ષં  પ્રથમજં  વેદઃ સત્યં
બ્રહ્મેતિ; સત્યઁ  હ્યેવ  બ્રહ્મ ।

ch6

pM1/k5,4

આપ એવેદમગ્ર આસુસ્; તા  આપઃ સત્યમસૃજન્ત, સત્યં  બ્રહ્મ, બ્રહ્મ
પ્રજાપતિં, પ્રજાપતિર્દેવાન્ ।

pM2/kch6, p1

તે  દેવાઃ  સત્યમિત્ય્
K  એવ!

ઉપાસતે તદેતત્ત્ર્યક્ષરઁ : સત્યમ્
K  સતિયમ્

ઇતિ । સ  ઇત્યેકમક્ષરં; તીત્યેકમક્ષરં, અમ્
K  યમ્

ઇત્યેકમક્ષરમ્ । પ્રથમોત્તમે  અક્ષરે સત્યં, મધ્યતોઽનૃતમ્
તદેતદનૃતમ્
Kadd  ઉભયતઃ
સત્યેન પરિગૃહીતઁ  સત્યભૂયમેવ  ભવતિ । નૈવંવિદ્વાઁ સમનૃતઁ
હિનસ્તિ ।

pM3/k2

તદ્યત્તત્સત્યમસૌ  સ  આદિત્યો  । ય  એષ  એતસ્મિન્મણ્ડલે પુરુષો

યશ્ચાયં દક્ષિણેઽક્ષન્પુરુષઃ તાવેતાવન્યોઽન્યસ્મિન્પ્રતિષ્ઠિતૌ; રશ્મિભિરેષોઽસ્મિન્પ્રતિષ્ઠિતઃ, પ્રાણૈરયમમુષ્મિન્ । સ યદોત્ક્રમિષ્યન્ભવતિ, શુદ્ધમેવૈતન્મણ્ડલં પશ્યતિ; નૈનમેતે રશ્મયઃ પ્રત્યાયન્તિ ।

pM4/k3

ય એષ એતસ્મિન્મણ્ડલે પુરુષઃ તસ્ય ભૂરિતિ શિરઃ એકꣳ શિર, એકમેતદક્ષરં; ભુવ ઇતિ બાહૂ દ્વૌ બાહૂ, દ્વે એતે અક્ષરે; સ્વરિતિ પ્રતિષ્ઠાઃ દ્વે પ્રતિષ્ઠે દ્વે એતે અક્ષરે । તસ્યોપનિષદહરિતિ । હન્તિ પાપ્માનં જહાતિ ચ, ય એવં વેદ ।

pM5/k4

અથ

K ૐ

યોઽયં દક્ષિણેઽક્ષન્પુરુષઃ તસ્ય ભૂરિતિ શિરઃ એકꣳ શિર, એકમેતદક્ષરં; ભુવ ઇતિ બાહૂ દ્વૌ બાહૂ, દ્વે એતે અક્ષરે; સ્વરિતિ પ્રતિષ્ઠાઃ દ્વે પ્રતિષ્ઠે, દ્વે એતે અક્ષરે । તસ્યોપનિષદહમિતિ । હન્તિ પાપ્માનં જહાતિ ચ, ય એવં વેદ ।

ch7

વિદ્યુદ્બ્રહ્મેત્યાહુઃ । વિદાનાદ્વિદ્યુદ્; વિદ્યત્યેનં પાપ્મનો, ય એવં વેદઃ વિદ્યુદ્બ્રહ્મેતિ । વિદ્યુદ્ધ્યેવ બ્રહ્મ ।

chM8/k6

મનોમયોઽયં પુરુષો, ભાઃસત્યઃ તસ્મિન્નન્તર્હૃદયે યથા વ્રીહિર્વા યવો વૈવમયમન્તરાત્મન્પુરુષઃ

K ૐ એવમ્...

સ એષ સર્વસ્ય વશી

K ૐ

સર્વસ્યેશાનઃ, સર્વસ્યાધિપતિઃ; સર્વમિદં પ્રશાસ્તિ યદિદં કિઙ્ચ, ય એવં વેદ

K ૐ

chM9/k8

વાચં ધેનુમુપાસીત । તસ્યાશ્ચત્વારઃ સ્તનાઃ સ્વાહાકારો
વષટ્કારો હન્તકારઃ સ્વધાકારઃ । તસ્યૈ દ્વૌ સ્તનૌ દેવા ઉપજીવન્તિ,
સ્વાહાકારં ચ વષટ્કારં ચ; હન્તકારં મનુષ્યાઃ, સ્વધાકારં પિતરઃ । તસ્યાઃ
પ્રાણ ઋષભો, મનો વત્સઃ ।

chM10/k9

અયમગ્નિર્વૈશ્વાનરો યોઽયમન્તઃ પુરુષે, યેનેદમન્નં પચ્યતે
યદિદમદ્યતે । તસ્ય એષ ઘોષો ભવતિ, યમેતત્કર્ણાવપિધાય શ઼ૃણોતિ ।
સ યદોત્ક્રમિષ્યન્ભવતિ, નૈનં ઘોષꣳ શ઼ૃણોતિ ।

ch11

એતદ્વૈ પરમં તપો યદ્વ્યાહિતસ્તપ્યતે; પરમꣳ હૈવ લોકં જયતિ,
ય એવં વેદૈતદ્વૈ પરમં તપો યં પ્રેતમરણ્યꣳ હરન્તિ;
પરમꣳ હૈવ લોકં જયતિ, ય એવં વેદૈતદ્વૈ પરમં તપો યં
પ્રેતમગ્નાવભ્યાદધતિ; પરમꣳ હૈવ લોકં જયતિ, ય એવં વેદ ।

chM12/k10

યદા વૈ પુરુષોઽસ્માલ્ લોકાત્પ્રૈતિ, સ વાયુમાગચ્છતિ; તસ્મૈ સ
તત્ર વિજિહીતે યથા રથચક્રસ્ય ખં; તેન સ ઊર્ધ્વ આક્રમતે । સ
આદિત્યમાગચ્છતિ; તસ્મૈ સ તત્ર વિજિહીતે યથાઽમ્બરસ્ય
K અલમ્બરસ્ય

ખં; તેન સ ઊર્ધ્વ આક્રમતે । સ ચન્દ્રમસમાગચ્છતિ; તસ્મૈ સ
તત્ર વિજિહીતે યથા દુન્દુભેઃ ખં; તેન સ ઊર્ધ્વ આક્રમતે । સ
લોકમાગચ્છત્યશોકમહિમં; તસ્મિન્વસતિ શાશ્વતીઃ સમાઃ ।

chM13/k12

pMK1

અન્નં બ્રહ્મેત્યેક આહુઃ । તન્ન તથા, પૂયતિ વા અન્નમૃતે પ્રાણાત્ ।
પ્રાણો બ્રહ્મેત્યેક આહુઃ । તન્ન તથા, શુષ્યતિ વૈ પ્રણ ઋતેઽન્નાદ્ ।
એતે હ ત્વેવ દેવતે, એકધાભૂયં ભૂત્વા, પરમતાં ગચ્છતઃ ।

pM2/k1

તદ્ધ સ્માહ પ્રાતૃદઃ પિતરમ્ કિꣳ સ્વિદેવૈવંવિદુષે સાધુ કુર્યાં,
કિમેવાસ્મા અસાધુ કુર્યામિતિ । સ હ સ્માહ પાણિનાઃ મા, પ્રાતૃદ, કસ્
ત્વેનયોરેકધાભૂયં ભૂત્વા પરમતાં ગચ્છતીતિ ।

pM3/k1

તસ્મા ઉ હૈતદુવાચઃ વીતિ અન્નં વૈ વિ અન્ને હીમાનિ સર્વાણિ ભૂતાનિ વિષ્ટાનિ ।
રમિતિ, પ્રાણો વૈ રં, પ્રાણે હીમાનિ સર્વાણિ ભૂતાનિ રતાનિ
K રમન્તે

સર્વાણિ હ વા અસ્મિન્ભૂતાનિ વિશન્તિ, સર્વાણિ ભૂતાનિ રમન્તે, ય એવં વેદ ।

chM14/k13

pMK1

ઉક્થં, પ્રાણો વા ઉક્થં, પ્રાણો હીદꣳ સર્વમુત્થાપયતિ । ઉદ્ધાસ્મા
K ધસ્માદ્

ઉક્થવિદ્વીરસ્તિષ્ઠતિ ઉક્થસ્ય સાયુજ્યꣳ સલોકતાં જયતિ, ય એવં વેદ ।

pMK2

યજુઃ, પ્રાણો વૈ યજુઃ, પ્રાણે હીમાનિ સર્વાણિ ભૂતાનિ યુજ્યન્તે । યુજ્યન્તે
હાસ્મૈ સર્વાણિ ભૂતાનિ શ્રૈષ્ઠ્યાય, યજુષઃ સાયુજ્યꣳ સલોકતાં જયતિ, ય
એવં વેદ ।

pMK3

સામ, પ્રાણો વૈ સામ, પ્રાણે હીમાનિ સર્વાણિ ભૂતાનિ સમ્યઙ્ચિ । સમ્યઙ્ચિ
હાસ્મૈ સર્વાણિ ભૂતાનિ શ્રૈષ્ઠ્યાય કલ્પન્તે, સામ્નઃ સાયુજ્યꣳ સલોકતાં જયતિ,
ય એવં વેદ ।

pMK4

ક્ષત્રં, પ્રાણો વૈ ક્ષત્રં, પ્રાણો હિ વૈ ક્ષત્રમ્ ત્રાયતે હૈનં પ્રાણઃ
ક્ષણિતોઃ । પ્ર ક્ષત્રમાત્રમ્
K અત્રમ્

આપ્નોતિ, ક્ષત્રસ્ય સાયુજ્યꣳ સલોકતાં જયતિ, ય એવં વેદ ।

chM15/k14

pMK1

ભૂમિરન્તરિક્ષં દ્યૌરિત્યષ્ટાવ્ ! અક્ષરાણિ અષ્ટાક્ષરꣳ હ વા એકં
ગાયત્ર્યૈ પદમ્; એતદુ હૈવાસ્યા એતત્ । સ યાવદેષુ ત્રિષુ લોકેષુ,
તાવદ્ધ જયતિ યોઽસ્યા એતદેવં પદં વેદ ।

pMK2

ઋચો યજૂષિ સામાનીત્યષ્ટાવક્ષરાણિ અષ્ટાક્ષરꣳ હ વા એકં ગાયત્ર્યૈ
પદમ્; એતદુ હૈવાસ્યા એતત્ । સ યાવતીયં ત્રયી વિદ્યા, તાવદ્ધ જયતિ,
યોઽસ્યા એતદેવં પદં વેદ ।

pMK3

પ્રાણોઽપાનો વ્યાન ઇત્યષ્ટાવક્ષરાણિ અષ્ટાક્ષરꣳ હ વા એકં ગાયત્ર્યૈ
પદમ્; એતદુ હૈવાસ્યા એતત્ । સ યાવદિદં પ્રાણિ, તાવદ્ધ જયતિ, યોઽસ્યા
એતદેવં પદં વેદ ।

pM4/k3

અથાસ્યા એતદેવ તુરીયં દર્શતં પદં પરોરજા ય એષ તપતિઃ યદ્વૈ
ચતુર્થં તત્તુરીયં; દર્શતં પદમિતિ, દદૃશ ઇવ હ્યેષઃ; પરોરજા
ઇતિ, સર્વમુ હ્યેવૈષ રજ ઉપર્યુ-ઉપરિ તપતિ । એવꣳ હૈવ શ્રિયા
યશસા તપતિ, યોઽસ્યા એતદેવં પદં વેદ ।

pM5/k4

સૈષા ગાયત્ર્યેતસ્મિꣳસ્તુરીયે દર્શતે પદે પરોરજસિ પ્રતિષ્ઠિતા;
તદ્વૈ તત્સત્યે પ્રતિષ્ઠિતા

K પ્રતિષ્ઠિતં

ચક્ષુર્વૈ સત્યં, ચક્ષુર્હિ વૈ સત્યમ્ તસ્માદ્યદિદાનીં દ્વૌ
વિવદમાનાવેયાતમ્ અહમદ્રાક્ષમ્

K અદર્શમ્

અહમશ્રૌષમિતિ, ય એવ

K એવં

બ્રૂયાદહમદ્રાક્ષમ્

K અદર્શમ્

ઇતિ, તસ્મા એવ શ્રદ્દધ્યાત્

K શ્રદ્દધ્યામ

pM6/k4

તદ્વૈ તત્સત્યં બલે પ્રતિષ્ઠિતં; પ્રાણો વૈ બલં; તત્પ્રાણે

પ્રતિષ્ઠિતં; તસ્માદાહુઃ બલꣳ સત્યાદોજીય ઇતિ । એવં વેષા
ગાયત્ર્યધ્યાત્મં પ્રતિષ્ઠિતા ।

pM7/k4

સા હૈષા ગયાꣳસ્તત્રે; પ્રાણા વૈ ગયાસ્; તત્પ્રાણાસ્તત્રે; તદ્યદ્ગયાꣳસ્
તત્રે, તસ્માદ્ગાયત્રી નામ । સ યામેવામૂꣳ
Kadd સાવિત્રીમ્
અન્વાહૈષૈવ સા । સ યસ્મા અન્વાહ, તસ્ય પ્રાણાસ્ત્રાયતે ।

pM8/k5

તાꣳ હ
Kadd એતામ્
એકે સાવિત્રીમનુષ્ટુભમન્વાહુઃ વાગનુષ્ટુબ્; એતદ્વાચમનુબ્રૂમ ઇતિ । ન
તથા કુર્યાદ્ । ગાયત્રીમેવાનુબ્રૂયાદ્
K એવ સાવિત્રીમ્...

યદિ હ વા અપિ
Kadd એવંવિદ્
બહ્વિવ પ્રતિગૃહ્ણાતિ, ન હૈવ તદ્ગાયત્ર્યા એકં ચન પદં પ્રતિ ।

pM9/k6

સ ય ઇમાꣳસ્ત્રીંલ્ લોકાન્પૂર્ણાન્પ્રતિગૃહ્ણીયાત્ સોઽસ્યા એતત્પ્રથમં
પદમાપ્નુયાદ્; અથ યાવતીયં ત્રયી વિદ્યા, યસ્તાવત્પ્રતિગૃહ્ણીયાત્ સોઽસ્યા
એતદ્દ્વિતીયં પદમાપ્નુયાદ્; અથ યાવદિદં પ્રાણિ, યસ્તાવત્પ્રતિગૃહ્ણીયાત્
સોઽસ્યા એતત્તૃતીયં પદમાપ્નુયાદ્; અથાસ્યા એતદેવ તુરીયં દર્શતં પદં,
પરોરજા ય એષ તપતિ, નૈવ કેન ચનાપ્યમ્ કુત ઉ એતાવત્પ્રતિગૃહ્ણીયાત્ ।

pM10/k7

તસ્યા ઉપસ્થાનમ્ ગાયત્રિ અસ્યેકપદી દ્વિપદી ત્રિપદી ચતુષ્પદિ અપદસિ, ન
હિ પદ્યસે । નમસ્તે તુરીયાય દર્શતાય પદાય પરોરજસેઽસાવદો મા
પ્રાપદિતિ, યં દ્વિષ્યાદ્; અસાવસ્મૈ કામો મા સમર્ધીતિ વા, ન હૈવાસ્મૈ સ
કામઃ સમૃધ્યતે યસ્મા એવમુપતિષ્ઠતે; અહમદઃ પ્રાપમિતિ વા ।

pM11/k8

એતદ્ધ વૈ તજ્ જનકો વૈદેહો બુડિલમાશ્વતરાશ્વિમુવાચઃ યન્નુ હો
તદ્ગાયત્રીવિદબ્રૂથા, અથ કથꣳ હસ્તી ભૂતો વહસીતિ । મુખꣳ

હ્યસ્યાઃ, સમ્રાડ્, ન વિદાં ચકરેતિ હોવાચ ।

pM12/k8

તસ્યા આગ્નિરેવ મુખં; યદિ હ વા અપિ બહ્વિવાગ્નાવભ્યાદધતિ, સર્વમેવ
તત્સન્દહતિ । એવઁ હૈવૈવંવિદ્ યદ્યપિ બહ્વિવ પાપં કરોતિ
K કુરુતે

સર્વમેવ તત્સમ્પ્સાય શુદ્ધઃ પૂતોઽજરોઽમૃતઃ સમ્ભવતિ ।

chk15

Kadd
હિરણ્મયેન પાત્રેણ સત્યસ્યાપિહિતં મુખં; તત્ત્વં, પૂષન્ન્ અપાવૃણુ સત્યધર્માય દૃષ્ટયે ।
પૂષન્ન્ એકર્ષે, યમ, ષૂર્ય, પ્રાજાપત્ય, વ્યૂહ રશ્મીન્ સમૂહ તેજો; યત્તે રૂપં કલ્યાણતમં,
તત્તે પશ્યામિ । યોઽસાવસૌ પુરુષઃ, સોઽહમસ્મિ । વાયુરનિલમમૃતમ્ અથેદં ભસ્માન્તઁ
શરીરમ્ । ક્રતો, સ્મર, કૃતઁ સ્મર, ક્રતો, સ્મર, કૃતઁ સ્મરા- । -ગ્ને, નય
સુપથા રાયેઽસ્માન્ વિશ્વાનિ, દેવ, વયુનાનિ વિદ્વાન્; યુયોધ્યસ્મજ્ જુહુરાણમેનો, ભૂયિષ્ઠાં તે
નમઃઉક્તિં વિધેમ ।

ch6 = SBM 14.9 = SBK16.8

chM1/k2

pMK1

શ્વેતકેતુર્હ

k. OM
વા અરુણેયઃ પઞ્ચાલાનાં પરિષદમાજગામ । સ આજગામ જૈવલં પ્રવાહણં
પરિચારયમાણમ્ । તમુદીક્ષ્યાભ્યુવાદઃ કુમારાउ ઇતિ । સ ભોરૂउ ઇતિ
પ્રતિશુશ્રાવા- । -નુશિષ્ટો ન્વસિ પિત્રેતિ । ઓમિતિ હોવાચ ।

pMK2
વેત્થ યથેમાઃ પ્રજાઃ પ્રયત્યો વિપ્રતિપદ્યન્તાउ ઇતિ । નેતિ હોવાચ । વેત્થ
K વેત્થો

યથેમં લોકં પુનરાપદ્યન્તાउ ઇતિ । નેતિ હૈવોવાચ । વેત્થ
K વેત્થો

યથાસૌ લોક એવં બહુભિઃ પુનઃ-પુનઃ પ્રયદ્ભિર્ન સમ્પૂર્યતાउ ઇતિ ।

નેતિ હૈવોવાચ ।

pM3/k2

વેત્થ

K વેત્થો

યતિથ્યામાહુત્યાં૨ હુતાયામાપઃ પુરુષવાચો ભૂત્વા સમુત્થાય વદન્તીઉ ઇતિ ।
નેતિ હૈવોવાચ । વેત્થો દેવયાનસ્ય વા પથઃ પ્રતિપદં પિતૃયાણસ્ય વા,
યત્કૃત્વા દેવયાનં વા પન્થાનં પ્રતિપદ્યન્તે પિતૃયાણં વા

pM4/k2

અપિ હિ ન ઋષેર્વચઃ શ્રુતમ્ દ્વે સૃતી અશ઼ૃણવં પિતૄ઼ણામ્ અહં દેવાનામુત
મર્ત્યાનાં; તાભ્યામિદં વિશ્વમેજત્સમેતિ યદન્તરા પિતરં માતરં ચેતિ ।
નાહમત એકં ચન વેદેતિ હોવાચ ।

pM5/k3

અથ હૈનં

K ૐ હ

વસત્યોપમન્ત્રયાં ચક્રે । અનાદૃત્ય વસતિં કુમારઃ પ્રદુદ્રાવ । સ આજગામ
પિતરં, તં૨ હોવાચેતિ વાવ કિલ નો ભવાન્પુરાનુશિષ્ટાનવોચ ઇતિ ।
કથં૨, સુમેધ ઇતિ । પઙ્ચ મા પ્રશ્નાન્રાજન્યબન્ધુરપ્રાક્ષીત્ તતો નૈકં
ચન વેદેતિ હોવાચ

K ૐ હોવાચ

કતમે ત ઇતી- -મ ઇતિ હ પ્રતીકાન્યુદાજહાર ।

pM6/k4

સ હોવાચઃ તથા નસ્ત્વં, તત, જાનીથા યથા, યદહં કિઞ્ચ વેદ,
સર્વમહં તત્તુભ્યમવોચમ્ । પ્રેહિ તુ, તત્ર પ્રતીત્ય, બ્રહ્મચર્યં
વત્સ્યાવ ઇતિ । ભવાનેવ ગચ્છત્વિતિ ।

pM7/k4

સ આજગામ ગૌતમો યત્ર પ્રવાહણસ્ય જૈવલેરાસ । તસ્મા આસનમાહાર્યોદકં

K આહૃ઼ત્યોદકમ્

આહારયાં ચકારાથ હાસ્મા અર્ઘં

K અર્ઘ્યં

ચકાર ।

pM8/k4

તઁ હોવાચ વરં ભવતે

K ભગવતે

ગૌતમાય દદ્મ ઇતિ ।

pM8/k5

સ હોવાચ પ્રતિજ્ઞાતો મ એષ વરો; યાં તુ કુમારસ્યાન્તે વાચમભાષથાઃ

તાં મે બ્રૂહીતિ ।

pM9/k6

સ હોવાચ દૈવેષુ વૈ, ગૌતમ, તદ્વરેષુ, માનુષાણાં બ્રૂહીતિ ।

pM10/k7

સ હોવાચ વિજ્ઞાયતે હાસ્તિ હિરણ્યસ્યાપાત્તં ગોઅશ્વાનાં દાસીનાં પ્રવારાણાં

પરિધાનાનાં, મા નો ભવાન્બહોરનન્તસ્યાપર્યન્તસ્યાભ્યવદાન્યો ભૂદિતિ । સ

વૈ, ગૌતમ, તીર્થેનેચ્છસા ઇતિ ઉપૈમ્યહં ભવન્તમિતિ વાચા હ સ્મૈવ

પૂર્વ ઉપયન્તિ ।

pM11/k7

સ હોપાયનકીર્તા ઉવાચ

K સ ઉપાયનકીર્ત્યોવાસ

pM11/k8

તથા નસ્ત્વં, ગૌતમ, માપરાધાસ્

K અપરાધસ્

તવ ચ પિતામહા, યથેયં વિદ્યેતઃ પૂર્વં ન કસ્મિઁશ્ચન બ્રાહ્મન

ઉવાસ; તાં ત્વહં તુભ્યં વક્ષ્યામિઃ કો હિ ત્વૈવં બ્રુવન્તમર્હતિ

પ્રત્યાખ્યાતુમિતિ ।

pM12/k9

અસૌ વૈ લોકોઽગ્નિઃ ગૌતમ । તસ્યાદિત્ય એવ સમિદ્ રશ્મયો ધૂમો,

અહરર્ચિશ્, ચન્દ્રમા અઙ્ગારા

K દિશોઽઙ્ગારા

નક્ષત્રાણિ

K અવાન્તરદિશો

વિષ્ફુલિઙ્ગાઃ । તસ્મિન્નેતસ્મિન્નગ્નૌ દેવાઃ શ્રદ્ધાં જુહ્વતિ; તસ્યા આહુતેઃ
સોમો રાજા સમ્ભવતિ ।

pM13/k10

પર્જન્યો વા અગ્નિઃ ગૌતમ । તસ્ય સંવત્સર એવ સમિદભ્રાણિ ધૂમો,
વિદ્યુદર્ચિરશનિરઙ્ગારા, હ્રાદુનયો વિષ્ફુલિઙ્ગાઃ । તસ્મિન્નેતસ્મિન્નગ્નૌ
દેવાઃ સોમં

Kadd રાજાનં

જુહ્વતિ; તસ્યા આહુતેર્વૃષ્ટિઃ સમ્ભવતિ ।

pM14/k11

અયં વૈ લોકોઽગ્નિઃ ગૌતમ । તસ્ય પૃથિવ્યેવ સમિદ્ વાયુર્

K અગ્નિર્?

ધૂમો, રાત્રિરર્ચિઃ દિશો

K ચન્દ્રમા

અઙ્ગારા, અવન્તરદિશો

નક્ષત્રાણિ

વિષ્ફુલિઙ્ગાઃ ।
તસ્મિન્નેતસ્મિન્નગ્નૌ દેવા વૃષ્ટિં જુહ્વતિ;
તસ્યા આહુતેરન્નँ સમ્ભવતિ ।

pM15/k12

પુરુષો વા અગ્નિઃ ગૌતમ । તસ્ય વ્યાત્તમેવ સમિત્ પ્રાણો ધૂમો, વાગર્ચિશ્,
ચક્ષુરઙ્ગારાઃ, શ્રોત્રં વિષ્ફુલિઙ્ગાઃ । તસ્મિન્નેતસ્મિન્નગ્નૌ દેવા અન્નં
જુહ્વતિ; તસ્યા આહુતે રેતઃ સમ્ભવતિ ।

pM16/k13

યોષા વા આગ્નિઃ ગૌતમ । તસ્યા ઉપસ્થ એવ સમિલ્, લોમાનિ ધૂમો, યોનિરર્ચિઃ
યદન્તઃ કરોતિ, તેઽઙ્ગારા, અભિનન્દા વિષ્ફુલિઙ્ગાઃ । તસ્મિન્નેતસ્મિન્નગ્નૌ
દેવા રેતો જુહ્વતિ; તસ્યા આહુતેઃ પુરુષઃ સમ્ભવતિ । સ જાયતે

K ૐ

સ જીવતિ યાવજ્ જીવતિ અથ યદા મ્રિયતે,

pM16/k14
અથૈનમગ્નયે હરન્તિ ।

pM17/k14
તસ્યાગ્નિરેવાગ્નિર્ભવતિ, સમિત્સમિદ્ ધૂમો ધૂમો, અર્ચિરર્ચિરઙ્ગારા
અઙ્ગારા, વિષ્ફુલિઙ્ગા વિષ્ફુલિઙ્ગાઃ । તસ્મિન્નેતસ્મિન્નગ્નૌ દેવાઃ પુરુષં
જુહ્વતિ; તસ્યા આહુતેઃ પુરુષો ભાસ્વરવર્ણઃ સમ્ભવતિ ।

pM18/k15
તે ય એવમેતદ્વિદુઃ યે ચામી અરણ્યે શ્રદ્ધાँ સત્યમુપાસતે,
તેઽર્ચિરભિસમ્ભવન્તિ અર્ચિષોઽહરહ્ન આપૂર્યમાણપક્ષમ્
આપૂર્યમાણપક્ષાદ્યાન્ષણ્માસાનુદઙ્ઙ્ આદિત્ય એતિ, માસેભ્યો દેવલોકં,
દેવલોકાદાદિત્યમ્ આદિત્યાદ્વૈદ્યુતં; તાન્વૈદ્યુતાત્
K વૈદ્યુતાન્

પુરુષો માનસ એત્ય બ્રહ્મલોકાન્ગમયતિ; તે તેષુ બ્રહ્મલોકેષુ પરાઃ પરાવતો
વસન્તિ । તેષાં ઇહ
K ૐ

ન પુનરાવૃત્તિરસ્તિ
K ૐ

pM19/k16
અથ યે યજ્ઞેન દાનેન તપસા લોકં
K લોકાઙ્

જયન્તિ, તે ધૂમમભિસમ્ભવન્તિ, ધૂમાદ્રાત્રિँ, રાત્રેરપક્ષીયમાણપક્ષમ્
અપક્ષીયમાણપક્ષાદ્યાન્ષણ્માસાન્દક્ષિણાદિત્ય એતિ, માસેભ્યઃ પિતૃલોકં,
પિતૃલોકાચ્ચન્દ્રં; તે ચન્દ્રં પ્રાપ્યાન્નં ભવન્તિ; તાँસ્તત્ર દેવા
યથા સોમँ રાજાનમ્ આપ્યાયસ્વ, અપક્ષીયસ્વેતિ એવમેનાँસ્તત્ર ભક્ષયન્તિ ।
તેષાં યદા તત્પર્યવૈતિ અથેમમેવાકાશમભિનિષ્પદ્યન્ત, આકાશાદ્વાયું,
વાયોર્વૃષ્ટિં, વૃષ્ટેઃ પૃથિવીં; તે પૃથિવીં પ્રાપ્યાન્નં ભવન્તિ;

Kadd તે પુનઃ પુરુષાગ્નૌ હૂયન્તે,
તતો યોષાગ્નૌ જાયન્તે ।

લોકાન્પ્રત્યુત્થાયિનસ્

ત એવમેવાનુપરિવર્તન્તે । અથ ય એતૌ પન્થાનૌ ન વિદુઃ તે કીટાઃ, પતઙ્ગા, યદિદં દન્દશૂકમ્ ।

chM2/k1

pMK1

યો હ વૈ જ્યેષ્ઠં ચ શ્રેષ્ઠં ચ વેદ, જ્યેષ્ઠશ્ચ શ્રેષ્ઠશ્ચ સ્વાનાં ભવતિ । પ્રાણો વૈ જ્યેષ્ઠશ્ચ શ્રેષ્ઠશ્ચ । જ્યેષ્ઠશ્ચ શ્રેષ્ઠશ્ચ સ્વાનાં ભવતિ અપિ ચ યેષાં બુભૂષતિ, ય એવં વેદ ।

pMK2

યો હ વૈ વસિષ્ઠાં વેદ, વસિષ્ઠઃ સ્વાનાં ભવતિ । વાગ્વૈ વસિષ્ઠા । વસિષ્ઠઃ સ્વાનાં ભવતિ

Kadd અપિ ચ યેષાં બુભૂષતિ

ય એવં વેદ ।

pMK3

યો હ વૈ પ્રતિષ્ઠાં વેદ, પ્રતિતિષ્ઠતિ સમે, પ્રતિતિષ્ઠતિ દુર્ગે । ચક્ષુર્વૈ પ્રતિષ્ઠા; ચક્ષુષા હિ સમે ચ દુર્ગે ચ પ્રતિતિષ્ઠતિ । પ્રતિતિષ્ઠતિ સમે, પ્રતિતિષ્ઠતિ દુર્ગે, ય એવં વેદ ।

pMK4

યો હ વૈ સમ્પદં વેદ, સꣳ હાસ્મૈ પદ્યતે, યં કામં કામયતે । શ્રોત્રં વૈ સમ્પચ્; છ્રોત્રે હીમે સર્વે વેદા અભિસમ્પન્નાઃ । સꣳ હાસ્મૈ પદ્યતે, યં કામં કામયતે, ય એવં વેદ ।

pMK5

યો હ વા આયતનં વેદાયતનꣳ સ્વાનાં ભવતિ આયતનં જનાનામ્ । મનો વા આયતનમ્ । આયતનꣳ સ્વાનાં ભવતિ આયતનં જનાનાં, ય એવં વેદ ।

pMK6

યો હ વૈ પ્રજાતિં વેદ, પ્રજાયતે હ પ્રજયા પશુભી । રેતો વૈ પ્રજાતિઃ । પ્રજાયતે

Kadd હ

પ્રજયા પશુભિઃ ય એવં વેદ ।

pMK7

તે હેમે પ્રાણા, અહꣳ શ્રેયસે વિવદમાના, બ્રહ્મ જગ્મુઃ
Kadd તદ્ધોચુઃ
કો નો વસિષ્ઠ ઇતિ ।

editio una indicha et K add તદ્ધોવાચઃ
યસ્મિન્વ ઉત્ક્રાન્ત ઇદꣳ શરીરં પાપિયો મન્યતે,
સ વો વસિષ્ઠ ઇતિ ।

pMK8
વાગ્ઘોચ્ચક્રામ । સા સંવત્સરં પ્રોષ્યાગત્યોવાચઃ કથમશકત મદૃતે
જીવિતુમિતિ । તે હોચુઃ યથા કડા
K કલા

અવદન્તો વાચા, પ્રાણન્તઃ પ્રાણેન, પશ્યન્તશ્ચક્ષુષા, શ઼ૃણ્વન્તઃ શ્રોત્રેણ,
વિદ્વાꣳસો મનસા, પ્રજાયમાના રેતસૈવમજીવિષ્મેતિ । પ્રવિવેશ હ વાક્ ।

pMK9
ચક્ષુર્હોચ્ચક્રામ । તત્સંવત્સરં પ્રોષ્યાગત્યોવાચઃ કથમશકત મદૃતે
જીવિતુમિતિ । તે હોચુઃ યથાન્ધા, અપશ્યન્તશ્ચક્ષુષા, પ્રાણન્તઃ પ્રાણેન,
વદન્તો વાચા, શ઼ૃણ્વન્તઃ શ્રોત્રેણ, વિદ્વાꣳસો મનસા, પ્રજાયમાના
રેતસૈવમજીવિષ્મેતિ । પ્રવિવેશ હ ચક્ષુઃ ।

pMK10
શ્રોત્રꣳ હોચ્ચક્રામ । તત્સંવત્સરં પ્રોષ્યાગત્યોવાચઃ કથમશકત
મદૃતે જીવિતુમિતિ । તે હોચુઃ યથા બધિરા, અશ઼ૃણ્વન્તઃ શ્રોત્રેણ,
પ્રાણન્તઃ પ્રાણેન, વદન્તો વાચા, પશ્યન્તશ્ચક્ષુષા, વિદ્વાꣳસો મનસા,
પ્રજાયમાના રેતસૈવમજીવિષ્મેતિ । પ્રવિવેશ હ શ્રોત્રમ્ ।

pMK11
મનો હોચ્ચક્રામ । તત્સંવત્સરં પ્રોષ્યાગત્યોવાચઃ કથમશકત મદૃતે
જીવિતુમિતિ । તે હોચુઃ યથા મુગ્ધા, અવિદ્વાꣳસો મનસા, પ્રાણન્તઃ પ્રાણેન,
વદન્તો વાચા, પશ્યન્તશ્ચક્ષુષા, શ઼ૃણ્વન્તઃ શ્રોત્રેણ, પ્રજાયમાના
રેતસૈવમજીવિષ્મેતિ । પ્રવિવેશ હ મનઃ ।

pMK12
રેતો હોચ્ચક્રામ । તત્સંવત્સરં પ્રોષ્યાગત્યોવાચઃ કથમશકત મદૃતે
જીવિતુમિતિ । તે હોચુઃ યથા ક્લીબા, અપ્રજાયમાના રેતાસા, પ્રાણન્તઃ પ્રાણેન,

વદન્તો વાચા, પશ્યન્તશ્ચક્ષુષા, શ꣡ૃણ્વન્તઃ શ્રોત્રેણ, વિદ્વા꣡ꣳ સો
મનસૈવમજીવિષ્મેતિ । પ્રવિવેશ હ રેતઃ ।

pMK13

અથ હ પ્રાણ ઉત્ક્રમિષ્યન્ યથા મહાસુહયઃ સૈન્ધવઃ
પડ્વીશશઙ્ખૂન્ત્સંવૃહેદેવꣳ હૈવેમાન્પ્રાણાન્ત્સંવવર્હ । તે હોચુઃ
મા, ભગવ, ઉત્ક્રમીઃ ન વૈ શક્ષ્યામસ્ત્વદૃતે જીવિતુમિતિ । તસ્યો મે
બલિં કુરુતેતિ । તથેતિ ।

pMK14

સા હ વાગુવાચઃ યદ્વા અહં વસિષ્ઠાસ્મિ, ત્વં તદ્વસિષ્ઠોઽસીતિ ।
ચક્ષુર્
K ચક્ષુઃ

infine

યદ્વા અહં પ્રતિષ્ઠાસ્મિ, ત્વં તત્પ્રતિષ્ઠો !ઽસીતિ । શ્રોત્રં
K શ્રોત્રં

infine

યદ્વા અહꣳ સમ્પદસ્મિ, ત્વં તત્સમ્પદસીતિ । મનો
K મનો

infine

યદ્વા અહમાયતનમસ્મિ, ત્વં તદાયતનમસીતિ । રેતો
K રેતસ્

infine

યદ્વા અહં પ્રજાતિરસ્મિ, ત્વં તત્પ્રજાતિરસીતિ । તસ્યો મે કિમન્નં,
કિં વાસ ઇતિ । યદિદં કિઙ્ચા શ્વભ્ય, આ ક્રિમિભ્ય
K ક્ર꣡ઇમિભ્ય

આ કીટપતઙ્ગેભ્યઃ તત્તેઽન્નમ્; આપો વાસ ઇતિ । ન હ વા અસ્યાનન્નં જગ્ધં
ભવતિ, નાનન્નં પ્રતિગૃહીતં ય એવમેતદનસ્યાન્નં વેદ ।

pM15/k14

તદ્વિદ્વાꣳસઃ શ્રોત્રિયા અશિષ્યન્ત આચામન્તિ અશિત્વાચામન્તિ એતમેવ
તદન્નમનગ્નં કુર્વન્તો મન્યન્તે । તસ્માદેવંવિદશિષ્યન્નાચમેદશિત્વાચમેદ્ ।

એતમેવ તદનમનગ્નં કુરુતે
K ૐ તસ્માદ્...

ch3

pMK1

સ યઃ કામયતેઃ મહત્પ્રાપ્નુયામિતિ ઉદગયન આપૂર્યમાણપક્ષે
K આપૂર્યમાણપક્ષસ્ય

પુણ્યાહે, દ્વાદશાહમુપસદ્વ્રતી ભૂત્વૌદુમ્બરે કꣳસે ચમસે વા સર્વૌષધં
ફલાનીતિ સમ્ભૃત્ય, પરિસમુહ્ય, પરિલિપ્યાગ્નિમુપસમાધાયાવૃતાજ્યꣳ
K ઉપસમાધાય, પરિસ્તીર્યાવૃ઼ર઼્ઇતાજ્યꣳ

સꣳસ્કૃત્ય, પુꣳસા નક્ષત્રેણ મન્થꣳ સન્નીય, જુહોતિઃ

pM2/k1

યાવન્તો દેવાસ્ત્વયિ, જાતવેદઃ તિર્યઙ્ચો ઘ્નન્તિ પુરુષસ્ય કામાન્ તેભ્યોઽહં
ભાગધેયં જુહોમિ, તે મા તૃપ્તાઃ
Kadd સર્વૈઃ
કામૈસ્તર્પયન્તુ, સ્વાહા ।

pM3/k1

યા તિરશ્ચી નિપદ્યસેરહં વિધરણી ઇતિ, તાં ત્વા ઘૃતસ્ય ધારયા યજે
સꣳરાધનીમહꣳ । સ્વાહા । પ્રજાયતે ન ત્વદેતાન્યન્ય ઇતિ તૃતીયં
જુહોતિ।
K ૐ પ્રજાયતે ...

pM4/k2

જ્યેષ્ઠાય સ્વાહા, શ્રેષ્ઠાય સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે
સꣳસ્રવમવનયતિ । પ્રાણાય સ્વાહા, વસિષ્ઠાયૈ સ્વાહેતિ અગ્નૌ હુત્વા,
મન્થે સꣳસ્રવમવનયતિ । વાચે સ્વાહા, પ્રતિષ્ઠાયૈ સ્વાહેતિ અગ્નૌ
હુત્વા, મન્થે સꣳસ્રવમવનયતિ । ચક્ષુષે સ્વાહા, સમ્પદે સ્વાહેતિ અગ્નૌ
હુત્વા, મન્થે સꣳસ્રવમવનયતિ । શ્રોત્રાય સ્વાહાયતનાય સ્વાહેતિ અગ્નૌ
હુત્વા, મન્થે સꣳસ્રવમવનયતિ । મનસે સ્વાહા, પ્રજાત્યૈ સ્વાહેતિ અગ્નૌ
હુત્વા, મન્થે સꣳસ્રવમવનયતિ । રેતસે સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે
સꣳસ્રવમવનયતિ ।

pM5

K 3, variato ordine; vide infra

ભૂતાય સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે સꣳ સ્રવમવનયતિ ।
ભવિષ્યતે સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે સꣳ સ્રવમવનયતિ ।
વિશ્વાય સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે સꣳ સ્રવમવનયતિ । સર્વાય સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે સꣳ સ્રવમવનયતિ । પૃથિવ્યૈ સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે સꣳ સ્રવમવનયતિ । અન્તરિક્ષાય સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે સꣳ સ્રવમવનયતિ । દિવે સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે સꣳ સ્રવમવનયતિ । દિગ્ભ્યઃ સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે સꣳ સ્રવમવનયતિ । બ્રહ્મણે સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે સꣳ સ્રવમવનયતિ । ક્ષત્રાય સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે સꣳ સ્રવમવનયતિ ।

pM7

K 3, variato ordine; vide infra

ભૂઃ સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે સꣳ સ્રવમવનયતિ । ભુવઃ સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે સꣳ સ્રવમવનયતિ । સ્વઃ સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે સꣳ સ્રવમવનયતિ । ભૂર્ભુવઃ સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે સꣳ સ્રવમવનયતિ ।

pM8

K 3, variato ordine; vide infra

અગ્નયે સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે સꣳ સ્રવમવનયતિ । સોમાય સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે સꣳ સ્રવમવનયતિ । તેજસે સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે સꣳ સ્રવમવનયતિ । શ્રિયૈ સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે સꣳ સ્રવમવનયતિ । લક્ષ્મ્યૈ સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે સꣳ સ્રવમવનયતિ । સવિત્રે સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે સꣳ સ્રવમવનયતિ । સરસ્વત્યૈ સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે સꣳ સ્રવમવનયતિ । વિશ્વેભ્યો દેવેભ્યઃ સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે સꣳ સ્રવમવનયતિ । પ્રજાપતયે સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે સꣳ સ્રવમવનયતિ ।

pK3

K schribitpro m5-8; vide supra

અગ્નયે સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે સꣳસ્રવમવનયતિ । સોમાય સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે સꣳસ્રવમવનયતિ । ભૂઃ સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે સꣳસ્રવમવનયતિ । ભુવઃ સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે સꣳસ્રવમવનયતિ । સ્વઃ સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે સꣳસ્રવમવનયતિ । ભૂર્ભુવઃ સ્વઃ સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે સꣳસ્રવમવનયતિ । બ્રહ્મણે સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે સꣳસ્રવમવનયતિ । ક્ષત્રાય સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે સꣳસ્રવમવનયતિ । ભૂતાય સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે સꣳસ્રવમવનયતિ । ભવિષ્યતે સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે સꣳસ્રવમવનયતિ । વિશ્વાય સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે સꣳસ્રવમવનયતિ । સર્વાય સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે સꣳસ્રવમવનયતિ । પ્રજાપતયે સ્વાહેતિ અગ્નૌ હુત્વા, મન્થે સꣳસ્રવમવનયતિ ।

pM9/k4

અથૈનમભિમૃશતિ ભ્રમ્

K ભ્રમદ્

અસિ, જ્વલદસિ, પૂર્ણમસિ, પ્રસ્તબ્ધમસિ એકસભમસિ, હિઙ્કૃતમસિ, હિઙ્ક્રિયમાનમસિ ઉદ્ગીથમસિ ઉદ્ગીયમાનમસિ, શ્રાવિતમસિ, પ્રત્યાશ્રાવિતમસિ આર્દ્રે સન્દીપ્તમસિ, વિભૂરસિ, પ્રભૂરસિ, જ્યોતિરસિ અન્નમસિ,

K વરિઅતો ઓર્દિનેરન્નમસિ, જ્યોતિરસિ

નિધનમસિ, સંવર્ગોઽસીતિ ।

pM10/k5

અથૈનમુદ્યચ્છતિ આમꣳસ્યામꣳહિ તે મયિ

K આમꣳસ્ય્

આમꣳ હિ તે મયિ

K મહિ

સ હિ રાજેશાનોઽધિપતિઃ, સ માꣳ રાજેશનોઽધિપતિં કરોત્વિતિ ।

pM11/k6

અથૈનમાચામતિ તત્સવિતુર્વરેણ્યં મધુ વાતા ઋતાયતે મધુ ક્ષરન્તિ સિન્ધવો; માધ્વીર્નઃ સન્ત્વોષધીઃ । ભૂઃ સ્વાહા ।

pM12/k6

ભર્ગો દેવસ્ય ધીમહિ મધુ નક્તમુતોષસો, મધુમત્પાર્થિવꣳ રજો,

મધુ દ્યૌરસ્તુ નઃ પિતા  । ભુવઃ સ્વાહા ।

pM13/k6

ધિયો  યો  નઃ પ્રચોદયાદ્ । મધુમાન્નો વનસ્પતિઃ મધુમા ँ ર અસ્તુ સૂર્યો,
માધ્વીર્ગાવો ભવન્તુ નઃ । સ્વઃ  સ્વાહેતિ । સર્વાં ચ સાવિત્રીમન્વાહ, સર્વાશ્ચ
મધુમતીઃ સર્વાશ્ચ વ્યાહૃતીર્
K  ૐ સર્વાશ્ ...

અહમેવેદ ँ  સર્વં ભૂયાસમ્ । ભૂર્ભુવઃ સ્વઃ  સ્વાહેતિ । અન્તત  આચમ્ય,
પ્રક્ષાલ્ય પાણી
K  પાણી પ્રક્ષાલ્ય

જઘનેનાગ્નિં  પ્રાક્શિરાઃ સંવિશતિ ।

pM14/k6

પ્રાતરાદિત્યમુપતિષ્ઠતેઃ દિશામેકપુણ્ડરીકમસિ અહં  મનુષ્યાણામેકપુણ્ડરીકં
ભૂયાસમિતિ । યથેતમેત્ય, જઘનેનાગ્નિમાસીનો વ ँ શં  જપતિઃ

pM15/k7

ત ँ  હૈતમૂદ્દાલક આરુણિર્વાજસનેયાય યાજ્ઞવલ્ક્યાયાન્તેવાસિન ઉક્ત્વોવાચાપિ
ય  એન ँ  શુષ્કે સ્થાણૌ  નિષિઞ્ચેદ્ જાયેરઞ્ચાખાઃ, પ્રરોહેયુઃ પલાશાનીતિ ।

pM16/k8

એતમુ હૈવ  વાજસનેયો  યાજ્નવલ્ક્યો મધુકાય પૈઙ્ગ્યાયાન્તેવાસિન ઉક્ત્વોવાચાપિ
ય  એન ँ  શુષ્કે સ્થાણૌ  નિષિઞ્ચેદ્ જાયેરઞ્ચાખાઃ, પ્રરોહેયુઃ પલાશાનીતિ ।

pM17/k9

એતમુ હૈવ  મધુકઃ પૈઙ્ગ્યશ્ચૂડાય
K  ચૂલાય

ભાગવિત્તયેઽન્તેવાસિન ઉક્ત્વોવાચાપિ ય  એન ँ  શુષ્કે સ્થાણૌ  નિષિઞ્ચેદ્
જાયેરઞ્ચાખાઃ, પ્રરોહેયુઃ પલાશાનીતિ ।

pM18/k10

એતમુ હૈવ  ચૂડો
K  ચૂલો

ભાગવિત્તિર્જાનકય અયસ્થૂણાયાન્તેવાસિન
K  અયઃસ્થૂણાયાન્તેવાસિન

ઉક્ત્વોવાચાપિ ય એનꣳ શુષ્કે સ્થાણૌ નિષિઞ્ચેદ્
જાયેરઞ્છાખાઃ,
પ્રરોહેયુઃ પલાશાનીતિ ।

pM19/k11

એતમુ હૈવ જાનકિરાયસ્થૂણઃ
 K અયઃસ્થૂણઃ

ષત્યકામાય જાબાલાયાન્તેવાસિન ઉક્ત્વોવાચાપિ ય એનꣳ શુષ્કે સ્થાણૌ
નિષિઞ્ચેદ્ જાયેરઞ્છાખાઃ, પ્રરોહેયુઃ પલાશાનીતિ ।

pM20/k12

એતમુ હૈવ ષત્યકામો જાબાલોઽન્તેવાસિભ્ય ઉક્ત્વોવાચાપિ ય એનꣳ શુષ્કે
સ્થાણૌ નિષિઞ્ચેદ્ જાયેરઞ્છાખાઃ, પ્રરોહેયુઃ પલાશાનીતિ । તમેતં
નાપુત્રાય વાનન્તેવાસિને વા બ્રૂયાત્ ।

pM21/k13

ચતુરૌદુમ્બરો ભવતિ ઔદુમ્બરશ્ચમસ ઔદુમ્બરઃ સ્રુવ ઔદુમ્બર ઇધ્મ,
ઔદુમ્બર્યા ઉપમન્થ્યૌ ।

pM22/k13

દશ ગ્રામ્યાણિ ધાન્યાનિ ભવન્તિઃ વ્રીહિયવાસ્તિલમાષા અણુપ્રિયઙ્ગવો ગોધૂમાશ્ચ
મસૂરાશ્ચ ખલ્વાશ્ચ ખલકુલાશ્ચ; તાન્ત્સાર્ધં પિષ્ટ્વા દધ્ના મધુના
ઘૃતેનોપસિઞ્ચત્યૢ
 K તાન્પિષ્ટાન્દધનિ મધુનિ ઘૃ઼ઇત ઉપસિઞ્ચત્યૢ

આજ્યસ્ય જુહોતિ ।

ch4

pMK1

એષાં વૈ ભૂતાનાં પૃથિવી રસઃ, પૃથિવ્યા આપો, અપામોષધય, ઓષધીનાં
પુષ્પાણિ, પુષ્પાણાં ફલાનિ, ફલાનાં પુરુષઃ, પુરુષસ્ય રેતઃ ।

pMK2

સ હ પ્રજાપતિરીક્ષાં ચક્રે હન્તાસ્મૈ પ્રતિષ્ઠાં કલ્પયાનીતિ; સ
સ્ત્રિયꣳ સસૃજે । તાꣳ સૃષ્ટ્વાધ ઉપાસ્તઃ તસ્માત્સ્ત્રિયમધ ઉપાસીત,

શ્રીર્હ્યેશા
K ૐ શ્રીર્...

સ એતં પ્રાઙ્ચં ગ્રાવાણમાત્મન એવ સમુદપારયત્ તેનૈનામભ્યસૃજત ।

pMK3
તસ્યા વેદિરુપસ્થો, લોમાનિ બર્હિશ્, ચર્માધિષવણે, સમિદ્ધો મધ્યતસ્તૌ
મુષ્કૌ । સ યાવાન્હ વૈ વાજપેયેન યજમનસ્ય લોકો ભવતિ, તાવાનસ્ય લોકો
ભવતિ, ય એવં વિદ્વાનધોપહાસં ચરતિ; આ સ
K આસાઁ

સ્ત્રીણાઁ સુકૃતં વૃઙ્ક્તે । અથ ય ઇદમવિદ્વાનધોપહાસં ચરતિ આસ્ય
સ્ત્રિયઃ સુકૃતં વૃઙ્જતે ।

pMK4
એતદ્ધ સ્મ વૈ તદ્વિદ્વાનૂદ્દાલક આરુનિરાહૈતદ્ધ સ્મ વૈ તદ્વિદ્વાન્ણાકો
મૌદ્ગલ્ય આહૈતદ્ધ સ્મ વૈ તદ્વિદ્વાન્કુમારહારિત આહઃ બહવો મર્યા બ્રાહ્મનાયના
નિરિન્દ્રિયા વિસુકૃતોઽસ્માલ્ લોકાત્પ્રયન્તિ, ય ઇદમવિદ્વાઁ સોઽધોપહાસં
ચરન્તીતિ ।

pM5/k4
બહુ વા ઇદઁ સુપ્તસ્ય વા જાગ્રતો વા રેતઃ સ્કન્દતિ ।

pM5/k5
તદભિમૃશેદનુ વા મન્ત્રયેતઃ યન્મેઽદ્ય રેતઃ પૃથિવીમસ્કાન્ત્સીદ્
યદોષધીરપ્યસરદ્ યદપ, ઇદમહં તદ્રેત આદદે; પુનર્મામૈતુ
ઇન્દ્રિયં, પુનસ્તેજઃ, પુનર્ભગઃ; પુનરગ્નયો ધિષ્ણ્યા યથાસ્થાનં
કલ્પન્તામિત્યનામિકાઙ્ગુષ્ઠાભ્યામાદાયાન્તરેણ સ્તનૌ વા ભ્રુવૌ વા નિમૃજ્યાત્ ।

pMK6
અથ યદ્યુદક આત્માનં પશ્યેત્ તદભિમન્ત્રયેતઃ મયિ તેજ ઇન્દ્રિયં
યશો દ્રવિણઁ સુકૃતમિતિ ।

pM7/k6
શ્રીર્હ વા એષા સ્ત્રીણાં યન્મલોદ્વાસાઃ । તસ્માન્મલોદ્વાસસં
યશસ્વિનીમભિક્રમ્યોપમન્ત્રયેત ।

pM7/k7

સા ચેદસ્મૈ ન દદ્યાત્ કામમેનામપક્રિણીયાત્
K અવક્રિણીયાત્

સા ચેદસ્મૈ નૈવ દદ્યાત્ કામમેનાં યષ્ટ્યા વા પાણિના વોપહત્યાતિક્રામેદ્
ઇન્દ્રિયેન તે યશસા યશ આદદ, ઇત્યયશા એવ ભવતિ ।

pK8

Kadd
સા ચેદસ્મૈ દદ્યાદિન્દ્રિયેણ તે યશસા યશ આદધામીતિ યશસ્વિનાવેવ ભવતઃ ।

pM8/k9
સ યામિચ્છેત્ કામયેત મેતિ, તસ્યામર્થં નિષ્ઠાપ્ય !
K નિષ્ઠાય

મુખેન મુખꣳ સન્ધાયોપસ્થમસ્યા અભિમૃશ્ય, જપેદઙ્ગાદઙ્ગાત્સમ્ભવસિ,
હૃદયાદધિજાયસે; સ ત્વમઙ્ગકષાયોऽસિ, દિગ્ધવિદ્ધામિવ માદયેતિ
Kadd ઇમામમૂં મયીતિ

pM9/k10
અથ યામિચ્છેદ્ ન ગર્ભં દધીતેતિ, તસ્યામર્થં નિષ્ઠાપ્ય
K નિષ્ઠાય

મુખેન મુખꣳ સન્ધાયાભિપ્રાણ્યાપાન્યાદિન્દ્રિયેણ તે રેતસા રેત આદદ,
ઇત્યરેતા એવ ભવતિ ।

pM10/k11
અથ યામિચ્છેદ્ ગર્ભં દધીતેતિ, તસ્યામર્થં નિષ્ઠાપ્ય
K નિષ્ઠાય

મુખેન મુખꣳ સન્ધાયાપાન્યાભિપ્રાણ્યાદિન્દ્રિયેણ તે રેતસા રેત આદધામીતિ;
ગર્ભિણ્યેવ ભવતિ ।

pM11/k12
aliteH vide infra
અથ યસ્ય જાયાયૈ જારઃ સ્યાત્ તં ચેદ્વિષ્યાદામપાત્રેऽગ્નિમુપસમાધાય,
પ્રતિલોમꣳ શરબર્હિઃ સ્તીર્ત્વા, તસ્મિન્નેતાઃ તિસ્રઃ શરભૃષ્ટીઃ પ્રતિલોમાઃ
સર્પિષાક્તા જુહુયાન્ મમ સમિદ્ધેऽહૌષીરશાપરાકાશૌ ત આદદે, અસાવિતિ
નામ ગૃભ્ણાતિ મમ સમિદ્ધેऽહૌષીઃ, પુત્રપશૂꣳ સ્ત આદદે, અસાવિતિ નામ

ગૃભ્ણાતિ મમ સમિદ્ધેऽહૌષીઃ, પ્રાણાપાનૌ  ત આદદે, અસાવિતિ નામ ગૃભ્ણાતિ સ
વા  એષ  નિરિન્દ્રિયો  વિસુકૃદસ્માલ્ લોકાદ્પ્રૈતિ, યમેવંવિદ્બ્રાહ્મણઃ  શપતિ ।
તસ્માદેવંવિત્શ્રોત્રિયસ્ય જાયાયોપહાસં  નેચ્છેદ્; ઉત  હ્યેવંવિત્પરો ભવતિ ।

pK12

m11 aliteH vide supra
અથ યસ્ય જાયાયૈ જારઃ સ્યાત્ તં ચેદ્વિષ્યાદામપાત્રેऽગ્નિમુપસમાધાય, પ્રતિલોમ ँ
શરબર્હિઃ સ્તીર્ત્વા, તસ્મિન્નેતાઃ શરભૃષ્ટીઃ પ્રતિલોમાઃ સર્પિષાક્તા જુહુયાન્ મમ
સમિદ્ધેऽહૌષીઃ, પ્રાણાપાનૌ ત આદદે, અસાવિતિ । મમ સમિદ્ધેऽહૌષીઃ, પુત્રપશૂ ँ સ્ત
આદદે, અસાવિતિ । મમ સમિદ્ધેऽહૌષીરશાપરાકાશૌ ત આદદે અસાવિતિ । મમ સમિદ્ધેऽહૌષીઃ
ઇષ્ટાસુકૃતે ત આદદે, અસાવિતિ । સ વા એષ નિરિન્દ્રિયો  વિસુકૃતોऽસ્માલ્ લોકાદ્પ્રૈતિ,
યમેવંવિદ્બ્રાહ્મણઃ શપતિ । તસ્માદેવંવિત્શ્રોત્રિયસ્ય દારેણ નોપહાસમિચ્છેદ્; ઉત હ્ય્
એવંવિત્પરો ભવતિ ।

pM12/k13
અથ યસ્ય જાયામાર્તવં  વિન્દેત્ ત્ર્યહં  ક ँ સે  ન  પિબેદહતવાસા; નૈનાં
વૃષલો, ન  વૃષલ્યુપહન્યાત્
K  અપહન્યાત્

ત્રિરાત્રાન્ત  આપ્લૂય
K  આપ્લુત્ય

વ્રીહીનવઘાતયેત્ ।

pM13/k14
સ  ય  ઇચ્છેત્ પુત્રો  મે ગૌરો
K  શુક્લો

જાયેત, વેદમનુબ્રુવીત, સર્વમાયુરિયાદિતિ, ક્ષીરૌદનં પાચયિત્વા
સર્પિષ્મન્તમશ્નીયાતામ્; ઈશ્વરૌ  જનયિતવૈ  ।

pM14/k15
અથ ય  ઇચ્છેત્ પુત્રો  મે કપિલઃ  પિઙ્ગલો  જાયેત, દ્વૌ  વેદાવનુબ્રુવીત,
સર્વમાયુરિયાદિતિ, દધ્યોદનં પાચયિત્વા  સર્પિષ્મન્તમશ્નીયાતામ્; ઈશ્વરૌ
જનયિતવૈ  ।

pM15/k16

અથ ય ઇચ્છેત્ પુત્રો મે શ્યામો લોહિતાક્ષો જાયેત, ત્રીન્વેદાનનુબ્રુવીત,
સર્વમાયુરિયાદિતિ ઉદૌદનં પાચયિત્વા સર્પિષ્મન્તમશ્નીયાતામ્; ઈશ્વરૌ
જનયિતવૈ ।

pM16/k17

અથ ય ઇચ્છેદ્ દુહિતા મે પણ્ડિતા જાયેત, સર્વમાયુરિયાદિતિ, તિલૌદનં
પાચયિત્વા સર્પિષ્મન્તમશ્નીયાતામ્; ઈશ્વરૌ જનયિતવૈ ।

pM17/k18

અથ ય ઇચ્છેત્ પુત્રો મે પણ્ડિતો વિજિગીથઃ

K વિગીતઃ

સમિતિઙ્ગમઃ શુશ્રૂષિતાં વાચં ભાષિતા જાયેત, સર્વાન્વેદાનનુબ્રુવીત,
સર્વમાયુરિયાદિતિ, મા ँ સૌદનં પાચયિત્વા સર્પિષ્મન્તમશ્નીયાતામ્; ઈશ્વરૌ
જનયિતવાઇ । અઉક્ષ્ણેણ

K ઔક્ષેણ

વાર્ષભેણ વા ।

pM18/k19

અથાભિપ્રાતરેવ સ્થાલીપાકાવૃતાજ્ય ँ ચેષ્ટિત્વા, સ્થાલીપાકસ્યોપઘાતં
જુહોતિ આગ્નયે સ્વાહા- -નુમતયે સ્વાહા દેવાય ષવિત્રે સત્યપ્રસવાય સ્વાહેતિ,
હુત્વોદ્ધૃત્ય પ્રાશ્નાતિ । પ્રાશ્યેતરસ્યાઃ પ્રયચ્છતિ । પ્રક્ષાલ્ય પાણી,
ઉદપાત્રં પૂરયિત્વા, તેનૈનાં ત્રિરભ્યુક્ષતિ ઉત્તિષ્ઠાતો, વિશ્વાવસૌ અન્યામિચ્છ
પ્રફુર્વ્યમ્

K પ્રપૂર્વ્યામ્

સં જાયાં પત્યા સહેતિ ।

pM19/k20

અથૈનામભિપદ્યતેરમોઽહમસ્મિ, સા ત્વ ँ ; સા ત્વમસિ અમોઽહ ँ ;
સામાહમસ્મિ ઋક્ત્વં; દ્યૌરહં, પૃથિવી ત્વમ્ । તાવેહિ સ ँ રભાવહૈ,
સહ રેતો દધાવહૈ પુ ँ સે પુત્રાય વિત્તય ઇતિ ।

pM20/k21

અથાસ્યા ઊરૂ વિહાપયતિઃ વિજિહીથાં દ્યાવાપૃથિવી ઇતિ । તસ્યામર્થં નિષ્ઠાપ્ય

K નિષ્ઠાય

મુખેન મુખꣳ સન્ધાય, ત્રિરેનામનુલોમામનુમાર્ષ્ટિ વિષ્ણુર્યોનિં કલ્પયતુ,
ત્વષ્ટા રૂપાણિ પિંશતુ આસિઞ્ચતુ પ્રજાપતિઃ ધાતા ગર્ભં દધાતુ તે । ગર્ભં
ધેહિ, ષિનીવાલિ; ગર્ભં ધેહિ, પૃથુષ્ટુકે । ગર્ભં તે આશ્વિનૌ દેવાવાધત્તાં
પુષ્કરસ્રજૌ ।

pM21/k22

હિરણ્યની

K હિરણ્મયી

અરણી યાભ્યાં નિર્મન્થતામાશ્વિનૌ દેવૌ

K ૐ

તં તે ગર્ભꣳ હવામહે, દશમે માસિ સૂતવે

K સૂતયે

યથાગ્નિગર્ભા પૃથિવી, યથા દ્યૌરિન્દ્રેણ ગર્ભિણી, વાયુર્દિશાં યથા ગર્ભ,
એવં ગર્ભં દધામિ તે, અસાવિતિ નામ ગૃહ્ણાતિ

K ૐ નામ ...

pM22/k23

સોષ્યન્તીમદ્ભિરભ્યુક્ષતિઃ યથા વાતઃ

K વાયુઃ

પુષ્કરિણીꣳ સમિઙ્ગયતિ સર્વત એવા તે ગર્ભ એજતુ, સહાવૈતુ જરાયુણે-
-ન્દ્રસ્યાયં વ્રજઃ કૃતઃ સાર્ગલઃ સપરિશ્રયસ; તમ્ ઈન્દ્ર, નિર્જહિ ગર્ભેણ
સાવરાꣳ સહેતિ ।

pM23/k24

જાતેઽગ્નિમુપસમાધાયાઙ્ક આધાય, કꣳસે પૃષદાજ્યꣳ સન્નીય,
પૃષદાજ્યસ્યોપઘાતં જુહોતિ અસ્મિન્ત્સહસ્રં પુષ્યાસમ્ એધમાનઃ સ્વગૃહે

K સ્વે ગૃ◌ઇહે

અસ્યોપસદ્યાં

K ઽસ્યોપસન્દ્યાં

મા છૈત્સીત્ પ્રજયા ચ પશુભિશ્ચ, સ્વાહા । મયિ પ્રાણાꣳસ્ત્વયિ મનસા
જુહોમિ, સ્વાહા ।

pMK24

યત્કર્મણાત્યરીરિચં, યદ્વા ન્યૂનમિહાકરમ્ આગ્નિસ્તત્સ્વિષ્ટકૃદ્વિદ્વાન્ત્
સ્વિષ્ટꣳ સુહુતં કરોતુ નઃ, સ્વાહેતિ ।

pM25

pro m25 schribitkrishna 25-26; vide infra

અથાસ્યાયુષ્યં કરોતિ દક્ષિણં કર્ણમભિનિધાયઃ વાગ્વાગિતિ ત્રિઃ । અથાસ્ય
નામધેયં કરોતિઃ વેદોઽસીતિ, તદસ્યૈતદ્ગુહ્યમેવ નામ સ્યાદ્ । અથ દધિ
મધુ ઘૃતꣳ સꣳ સૃજ્યાનન્તર્હિતેન જાતરૂપેણ પ્રાશયતિઃ ભૂસ્ત્વયિ
દધામિ, ભુવસ્ત્વયિ દધામિ, સ્વસ્ત્વયિ દધામિ; ભૂર્ભુવઃ સ્વઃ સર્વં
ત્વયિ દધામીતિ ।

pK25

maliteH vide supra

અથાસ્ય દક્ષિણં કર્ણમભિનિધાયઃ વાગ્વાગિતિ ત્રિઃ । અથ, દધિ મધુ
ઘૃતꣳ સન્નીયાનન્તર્હિતેન જાતરૂપેણ પ્રાશયતિઃ ભૂસ્તે દધામિ,
ભુવસ્તે દધામિ, સ્વસ્તે દધામિ; ભૂર્ભુવઃ સ્વઃ સર્વં ત્વયિ દધામીતિ ।

pK26

k; maliteH vide supra

અથાસ્ય નામ કરોતિઃ વેદોઽસીતિ । તદસ્યૈતદ્ગુહ્યમેવ નામ ભવતિ ।

pM26

K ૐ

અથૈનમભિમૃષતિ અશ્મા ભવ પરશુર્ભવ હિરણ્યમસ્રુતં ભવ; આત્મા વૈ
પુત્રનામાસિ । સ જીવ શરદઃ શતમિતિ ।

pM27/k28

અથાસ્ય માતરમભિમન્ત્રયતઃ ઙ્ડાસિ મૈત્રાવરુણી; વીરે વીરમજીજનથાઃ

K અજીજનત્

સા ત્વં વીરવતી ભવ, યાસ્માન્વીરવતોઽકરદિતિ ।

pM28/k27

અથૈનં માત્રે પ્રદાય સ્તનં પ્રયચ્છતિઃ યસ્તે સ્તનઃ શશયો યો
મયોભૂર્યો રત્નધા વસુવિદ્યઃ સુદત્રો, યેન વિશ્વા પુષ્યસિ વાર્યાણિ,
ષરસ્વતિ, તમિહ ધાતવે કરિતિ ।

pM29/k28

તં વા એતમાહુરતિપિતા બતાભૂરતિપિતામહો બતાભૂઃ । પરમાં બત કાષ્ઠાં
પ્રાપ શ્રિયા યશસા બ્રહ્મવર્ચસેન, ય એવંવિદો બ્રાહ્મણસ્ય પુત્રો જાયત
ઇતિ । [પનુસ્તુબ્]

pM30

pro m4,30-33, K schribit5; vide infra

અથ વઁ શસ્; તદિદં વયં ભારદ્વાજીપુત્રાદ્ ભારદ્વાજીપુત્રો
વાત્સીમાણ્ડવીપુત્રાદ્ વાત્સીમાણ્ડવીપુત્રઃ પારાશરીપુત્રાદ્ પારાશરીપુત્રો
ગાર્ગીપુત્રાદ્ ગાર્ગીપુત્રઃ પારશરીકૌણ્ડિનીપુત્રાત્ પારશરીકૌણ્ડિનીપુત્રો
ગાર્ગીપુત્રાડ્, ગાર્ગીપુત્રો ગાર્ગીપુત્રાડ્, ગાર્ગીપુત્રો બાડેયીપુત્રાદ્ બાડેયીપુત્રો
મૌષિકીપુત્રાન્ મૌષીકિપુત્રો હારિકર્ણીપુત્રાદ્ ઢારિકર્ણીપુત્રો ભારદ્વાજીપુત્રાદ્
ભારદ્વાજીપુત્રઃ પૈઙ્ગીપુત્રાત્ પૈઙ્ગીપુત્રઃ

pM31

pro m4,30-33, K schribit5; vide infra

કાશ્યપીબાલાક્યામાઠરીપુત્રાત્ કાશ્યપીબાલાક્યામાઠરીપુત્રો કૌત્સીપુત્રાત્ કૌત્સીપુત્રો
ભૌધીપુત્રાદ્ ભૌધીપુત્રઃ હાલઙ્કાયનીપુત્રાચ્, હાલઙ્કાયનીપુત્રો
વાર્ષમણીપુત્રાદ્ વાર્ષમણીપુત્રો ગૌતમીપુત્રાદ્ ગૌતમીપુત્રઽત્રેયીપુત્રાદ્
અત્રેયીપુત્રો ગૌતમીપુત્રાદ્ ગૌતમીપુત્રો વાત્સીપુત્રાદ્ વાત્સીપુત્રો
ભારદ્વાજીપુત્રાદ્ ભારદ્વાજીપુત્રઃ પારાશરીપુત્રાત્ પારાશરીપુત્રો
વાર્કારુણીપુત્રાત્ વાર્કારુણીપુત્રોઽર્તભાગીપુત્રાત્ અર્તભાગીપુત્રઃ હૌઙ્ગીપુત્રાચ્,
છૌઙ્ગીપુત્રઃ ષાઙ્કૃતિપુત્રાત્ ષાઙ્કૃતિપુત્ર

pM32

pro m4,30-33, K schribit5; vide infra

અલમ્બીપુત્રાત્ અલમ્બીપુત્રઽલમ્બાયનીપુત્રાત્ અલમ્બાયનીપુત્રો જાયન્તીપુત્રાત્ જાયન્તીપુત્રો
માણ્ડૂકાયનીપુત્રાન્ માણ્ડૂકાયનીપુત્રો માણ્ડૂકીપુત્રાન્ માણ્ડૂકીપુત્રઃ હાણ્ડિલીપુત્રાત્
હાણ્ડિલીપુત્રો રાથીતરીપુત્રાદ્ રાથીતરીપુત્રો ક્રૌઙ્ચિકીપુત્રાભ્યાં,
ક્રૌઙ્ચિકીપુત્રૌ વૈદભૃતીપુત્રાદ્ વૈદભૃતીપુત્રો ભાલુકીપુત્રાદ્
ભાલુકીપુત્રઃ પ્રાચીનયોગીપુત્રાત્ પ્રાચીનયોગીપુત્રઃ ષાઞ્જીવીપુત્રાત્
ષાઞ્જીવીપુત્રઃ કાર્શકેયીપુત્રાત્ કાર્શકેયીપુત્રઃ

pM33

pro m4,30-33, K schribit5; vide infra

પ્રાશ્નીપુત્રાદસુરિવાસિનઃ પ્રાશ્નીપુત્ર અસુરાયનાદસુરાયણ  અસુરેઃ
અસુરિઃ  યાજ્ઞવલ્ક્યાદ્ યાજ્ઞવલ્ક્ય ઊદ્દાલકાદૂદ્દાલકોઽરુણાદરુણ
ઓપવેશેઃ ઓપવેશિઃ કુશ્રેઃ, કુશ્રિર્વાજશ્રવસો, વાજશ્રવા જીહ્વાવતો બાધ્યોગાત્
જીહ્વાવાન્બાધ્યોગોઽસિતાદ્વાર્ષગણાદસિતો વાર્ષગણો હરિતાત્કશ્યપાદ્ ઢરિતઃ
કશ્યપઃ હિલ્પાત્કશ્યપાચ્, છિલ્પઃ કશ્યપઃ કશ્યપાન્ણૈધ્રુવેઃ, કશ્યપો
ણૈધ્રુવિર્વાચો, વાગામ્ભિણ્યા, આમ્ભિણ્યદિત્યાદાદિત્યાનીમાનિ શુક્લાનિ
યજૂꣳષિ વાજસનેયેન યાજ્ઞવલ્ક્યેનાખ્યયન્તે ।

chk5

schribitkrishna pro m4,30-33

pK1

અથ વꣳશઃ પૌતિમાષીપુત્રઃ કાત્યાયનીપુત્રાત્ કાત્યાયનીપુત્રો
ગૌતમીપુત્રાદ્ ગૌતમીપુત્રો ભારદ્વાજીપુત્રાદ્ ભારદ્વાજીપુત્રઃ પારાશરીપુત્રાત્
પારાશરીપુત્ર ઔપસ્વસ્તીપુત્રાદૌપસ્વસ્તીપુત્રઃ પારાશરીપુત્રાત્ પારાશરીપુત્રઃ
કાત્યાયનીપુત્રાત્ કાત્યાયનીપુત્રઃ કૌશિકીપુત્રાત્ કૌશિકીપુત્ર અલમ્બીપુત્રાચ્ચ
વૈયાઘ્રપદીપુત્રાચ્ચ, વૈયાઘ્રપદીપુત્રઃ કાણ્વીપુત્રાચ્ચ કાપીપુત્રાચ્ચ,
કાપીપુત્રઃ

pK2

અત્રેયીપુત્રાદત્રેયીપુત્રો ગૌતમીપુત્રાદ્ ગૌતમીપુત્રો ભારદ્વાજીપુત્રાદ્ ભારદ્વાજીપુત્રઃ
પારાશરીપુત્રાત્ પારાશરીપુત્રો વાત્સીપુત્રાદ્ વાત્સીપુત્રઃ પારાશરીપુત્રાત્
પારાશરીપુત્રો વાર્કારુનીપુત્રાદ્ વાર્કારુણીપુત્રો વાર્કારુણીપુત્રાદ્ વાર્કારુણીપુત્ર
અર્તભાગીપુત્રાદર્તભાગીપુત્રઃ હૌઙ્ગીપુત્રાચ્, છૌઙ્ગીપુત્રઃ ષાન્કૃતીપુત્રાત્
ષાઙ્કૃતીપુત્ર અલમ્બાયનીપુત્રાદલમ્બાયનીપુત્ર અલમ્બીપુત્રાદલમ્બીપુત્રો
જાયન્તીપુત્રાત્ જાયન્તીપુત્રો માણ્ડૂકાયનીપુત્રાન્ માણ્ડૂકાયનીપુત્રો માણ્ડૂકીપુત્રાન્
માણ્ડૂકીપુત્રઃ હાણ્ડિલીપુત્રાચ્, છાણ્ડિલીપુત્રો રાથીતરીપુત્રાદ્ રાથીતરીપુત્રો
ભાલુકીપુત્રાદ્ ભાલુકીપુત્રઃ ક્રૌઙ્ચિકીપુત્રાભ્યાં, ક્રૌઙ્ચિકીપુત્રૌ
વૈદભૃતીપુત્રાદ્ વૈદભૃતીપુત્રઃ કાર્શકેયીપુત્રાત્ કાર્શકેયીપુત્રઃ
પ્રાચીનયોગીપુત્રાત્ પ્રાચીનયોગીપુત્રઃ ષાઙ્જીવીપુત્રાત્ ષાઙ્જીવીપુત્રઃ
પ્રાશ્નીપુત્રાદસુરિવાસિનઃ, પ્રાશ્નીપુત્ર અસુરાયણાદસુરાયણ અસુરેરાસુરિઃ

pK3

યાજ્ઞવલ્ક્યાદ્ યાજ્ઞવલ્ક્ય ઊદ્દાલકાદૂદ્દાલકોઽરુણાદારુણ ઊપવેશેઃ
ઊપવેશિઃ કુશ્રેઃ, કુશ્રિર્વાજશ્રવસો, વાજશ્રવા જીહ્વાવતો બાધ્યોગાત્
જીહ્વાવાન્બાધ્યોગોઽસિતાદ્વાર્ષગણાદ્ આસિતો વાર્ષગણો હરિતાત્કશ્યપાદ્ ઢરિતઃ
કશ્યપઃ હિલ્પાત્કશ્યપાત્ હિલ્પઃ કશ્યપઃ કશ્યપાન્ણૈધ્રુવેઃ, કશ્યપો
ણૈધ્રુવિર્વાચો, વાગામ્ભિણ્યા, આમ્ભિણ્યદિત્યાદ્; આદિત્યાનીમાનિ શુક્લાનિ યજૂꣳષિ
વાજસનેયેન યાજ્ઞવલ્ક્યેનાખ્યયન્તે ।

pK4
ષમાનમા ષાઙ્જીવીપુત્રાત્ ષઙ્જિવીપુત્રો માણ્ડૂકાયનેઃ માણ્ડૂકાયનિર્માણ્ડવ્યાદ્
માણ્ડવ્યઃ કૌત્સાત્ કૌત્સો માહિત્થેઃ માહિત્થિર્વામકક્ષાયણાદ્ વામકક્ષાયણઃ
હાણ્ડિલ્યાચ્, છાણ્ડિલ્યો વાત્સ્યાદ્ વાત્સ્યઃ કુશ્રેઃ, કુશ્રિર્યજ્ઞવચસઃ
રાજસ્તમ્બાયનાદ્ યજ્ઞવચા રાજસ્તમ્બાયનઃ ટુરાત્કાવષેયાત્ ટુરઃ કાવષેયઃ
પ્રજાપતેઃ, પ્રજાપતિર્બ્રહ્મણો; બ્રહ્મ સ્વયમ્ભુ । બ્રહ્મણે નમઃ ।

BrihadAraNyakopaniShad MAdhyandina-Recension / KANva-Recension
edited by Marcos Albino, Erlangen 1996-1997; TITUS version by
Jost Gippert,

---

*Brihadaranyaka Upanishad with Vedic Accents*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*